॥ श्रीः ॥

जैमिनीयसूत्राणि ।

महर्षिवर्यश्रीजैमिनिमुनिप्रणीतानि ।

ज्योतिर्विन्नीलकण्ठविरचित-

सुबोधिनीटीकासमेतानि ।

तत्र च

प्रथममध्यायद्वयं सटीकमग्रिमं

चाध्यायद्वयमटीकम् ।

तानि च

क्षेमराज-श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

(खेतवाडी ७ वीं गली खम्बाटा लेन)

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितानि ।

संवत् १९६९, शके १८३४.

॥ श्रीः ॥

जैमिनीयसूत्राणि ।

महर्षिवर्यश्रीजैमिनिमुनिप्रणीतानि ।

ज्योतिर्विन्नीलकण्ठविरचित-

सुबोधिनीटीकासमेतानि ।

तत्र च

प्रथममध्यायद्वयं सटीकमग्रिमं

चाध्यायद्वयमटीकम् ।

तानि च

क्षेमराज-श्रीकृष्णदास-श्रेष्ठिना

मुम्बय्यां

(खेतवाडी ७ वीं गली खम्बाटा लैन)

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितानि ।

संवत् १९६९, शके १८३४.

॥ श्रीः ॥

अथ नीलकण्ठीटीकासहितानि
जैमिनीयसूत्राणि प्रारभ्यन्ते ।

सृष्टिस्थित्यंतकर्त्रीहरिहरविधिभिःसेवितानंददात्री
नानातंत्रोक्तमार्गैर्मुनिभिरपिधियाभालचंद्रोज्ज्वलांगी ।
आरक्ताभत्रिनेत्राशिवशवनिलयाराजराजेश्वरीसा
वाचंनोह्यातनोतुप्रतिपदकठिनेजैमिनेः सूत्रसंघे ॥ १ ॥

विवस्वद्वंशाग्र्यावनिपतिवरश्रीरणजितो दयांभोधेर्वाचातवकरुणयाजैमिनिमुनेः ।
निरालंबेशास्त्रेजननिगिरिजेयास्यतिनकिंसुटीकामेकामोह्वदिसमभिपूर्तिंरचयितुम् २ ॥

उपदेशं व्याख्यास्यामः ॥ १ ॥

अथप्राक्तनकर्मज्ञानानुष्ठेयकाशीवासादिनाजगदुद्धारंचिकीर्षुः करुणासिंधुर्जैमिनिमुनिः प्रारिप्सितग्रंथप्रतिबंधकोपशमनायश्रीशंकरप्रणतिपूर्वकंसकललोकशुभाशुभसूचकजातकशास्त्रमनुष्ठातुंप्रतिजानीते । उचतत्पदसुपदंतस्येशः शंकरस्तंव्याख्यास्यामःनमस्कुर्मः "उकारःशंकरःप्रोक्तः" इत्येकाक्षरकोशः । प्रकृतार्थस्तु उपदिश्यतेप्रकाश्यतेप्राक्तनशुभाशुभकर्मानेनेत्युपदेशोजातकशास्त्रविशेषस्तंव्याख्यास्यामःकथयिष्याम इति ॥ १ ॥

अभिपश्यन्त्यृक्षाणि ॥ २ ॥ पार्श्वभे च ॥ ३ ॥

नन्वस्मिन्शास्त्रेकिमन्यशास्त्रतोदृष्टिर्विलक्षणोतान्यशास्त्रप्रसिद्धैवेतिसंशयंपरिहरन्नाह । ऋक्षाणिराशयःअभिसम्मुखंपार्श्वभेपार्श्वराशीचपश्यंतिअवलोकयंति क्रमतश्चरेऽष्टमपंचमैकादशराशयः स्थिरेषष्ठतृतीयनवमराशयः द्विस्वभावे सप्तमचतुर्थदशमराशयस्तथाभवन्तीतिदृष्टिचक्रेद्रष्टव्यम् । वृद्धकारिकाच "चरंधनंविनास्थास्नुस्थिरमंत्यंविनाचरम् । युग्मंस्वेनविनायुग्मंपश्यतीत्ययमागमः" इति । सदयंसंग्रह-

"चरा नाग ८ बाणे ९ श ११ राशीन्स्वतोवैस्थिराः षट् ६ तृतीयं ३ क ९ राशीन्क्रमेण । स्वतःशैलमं ७ वेद ४ मंपंक्ति १० मंच क्रमाद्विस्वभावाः प्रपंश्यंतिपूर्णम्" इति राशिषुसिद्धम् ॥ २ ॥ ३ ॥

तन्निष्ठाश्च तद्वत् ॥ ४ ॥

द्रष्टृदृश्यभावंखेटेष्वतिदिशति । तन्निष्ठाः राशिस्थिताग्रहास्तद्वत् तैराशिभिस्तुल्यं यथाभवतितथास्वस्थितराशिवदेवस्वतोष्टमादिराशींस्तन्निष्ठग्रहांश्चपश्यंतीत्यर्थः । तथाचोक्तंवृद्धैः "चरस्थंस्थिरगः पश्येत्स्थिरस्थंचरराशिगः । उभयस्थं तूभयगोनिकटस्थंविनाग्रहम्" ॥ ४ ॥

दार ४ भाग्य २ शूल ११ स्थार्गला निध्यातुः ॥ ५ ॥

"शुभार्गलेधनसमृद्धिः" इत्यादिसूत्रेष्वर्गलपदसंकेतस्याकांक्षांनिवर्तयन्नाह । विचाराश्रयीभूतस्यराशेर्निध्यातुर्द्रष्टुर्ग्रहाद्दारभाग्यशूलस्थाः दारादिपदबोध्यचतुर्थद्वितीयैकादशस्थानस्थिताग्रहाविचाराश्रयीभूतराशिद्रष्टुर्ग्रहस्यअर्गलाः अर्गलासंज्ञकाः स्युः अर्गलाकर्तरी इतियावत् । ननुस्वाम्यादिभिर्निध्यातुः फलदातुरित्युक्तत्वयाऽयमर्थः कथंज्ञात इतिचेच्छृणु "भग २ पुण्य ११ विना ४ भावाद्द्रष्टुराहुः शुभार्गलम्" इतिवृद्धवाक्यादेवशुभार्गलमर्गलाविप्रतिबंधकत्वमितिच्छंदोवत्सूत्राणीत्युक्तेः । संधिश्छांदसः । अत्राक्षरैरेवराशिभावबोधनंमुनेरभिप्रेतमित्यनुपदमेवस्फुटीभविष्यति । अस्मिन्ग्रंथेकटपयादिक्रमेणांकाग्राह्याः । तत्रापिद्वादशाधिकसंख्यासन्निपातेद्वादशतष्टंकृत्वाऽवशिष्टसंख्याराशिभावबोधिका । अत्रप्राच्यकारिकाच "कटपयवर्गभवैरिहपिंडांत्यैरक्षरैरंकाः । नञिचशून्यंज्ञेयंतथास्वरेकेवलेकथितम्" यथादारेत्यत्रांकानांवामतोगतिरितिरीत्यादकारस्याष्टसंख्यारकारस्यद्विसंख्येत्यष्टाविंशतिसंख्यामापन्नेपुंजेद्वादशतष्टेचोर्वरिता चतुःसंख्याभावबोधिकेति ॥ ५ ॥

कामस्थातुभूयसापापानाम् ॥ ६ ॥

इयमर्गलाशुभपापोभयसाधारणीनचोक्तार्गलप्रतिबंधकमादौवक्तव्यमितिवाच्यं तथासत्यर्गलापदस्यमंडूकप्लुत्यानुवृत्तेरस्वारस्यादर्गलांतरमेवाह । रविक्षीणचंद्रभौमशनिराहुकेतुपापयुतबुधानांमध्ये ... ... निर्देशाधिप्रभृ-

तिभिः पापैःकामस्थातृतीयस्थानस्याऽर्गलाभवति एकेनपापेनद्वाभ्यांचनेत्यर्थः । इयमर्गलापापसंबंधिनी । पूर्वातुशुभपापसाधारणी । प्रेमनिधिपंडितैस्तुपापानांमध्ये योधिकांशकस्तेनतृतीयेर्गलाभवतीति यदुक्तं तत्सूत्राक्षरार्थान्नायातिपापानांभूयसे- त्यनेनपापबाहुल्यंत्वायातीति बहुपापकृतकामस्थार्गलायानिर्बाधकत्वादेव पृथक्सू- त्रमिदम् ॥ ६ ॥

रिःफनीचकामस्थाविरोधिनः ॥ ७ ॥

पूर्वार्गलाबाधकान्याह । दारेत्यादिपदबोध्यचतुर्थद्वितीयैकादशस्थानस्थिताना- मर्गलाकर्तृणांखेटानांक्रमेणरिष्फादिपदबोध्यदशमद्वादशतृतीयस्थानस्थिताग्रहाविरो- धिनः अर्गलाप्रतिबंधकाइत्यर्थः । तथाचदशमादिस्थानेषुग्रहाभावेसत्येवचतुर्थादि- स्थानस्थैः ग्रहैः अर्गलाभवति नान्यथेति भावः ॥ ७ ॥

नन्यूनाविबलाश्च ॥ ८ ॥

बाधकबाधकानप्याह । अर्गलाकर्तृग्रहेभ्यःप्रतिबंधकाग्रहान्यूनाअल्पसंख्याकाः द्वौचेदर्गलाकर्तारावेकश्चेत्प्रतिबंधकइत्यादिविबलानिर्बलाश्च यदितदाप्रतिबंधकान स्युः । बलमग्रेनिरूपयिष्यति । अर्गलास्तत्प्रतिबंधकाश्चवृद्धैरुक्ताः "मय २ पुण्य ११ विना ४ भावाद्द्रष्टुराहुःशुभार्गलम् । स्फुटां१२ग ३ ज्ञेय १० भावात्तु विपरीतार्गलंविदुः ॥" द्रष्टुर्द्रष्टृग्रहस्यद्वितीयादितःशुभार्गलंप्राहुःअर्गलविरोध्यर्गलमे- वविपरीतार्गलमित्युच्यते ॥ ८ ॥

प्राग्वत्त्रिकोणे ॥ ९ ॥

तृतीयार्गलामुपदिशति । त्रिकोणेपंचमनवमयोः अर्गलातत्प्रतिबंधकश्चप्राग्व- त्पंचमेग्रहसत्त्वेऽर्गलानवमेन्युनसंख्यात्वनिर्बलत्वदोषरहितग्रहसत्त्वेऽर्गलाप्रतिबंधक- त्वमिति । नचदारेत्यादिसूत्रेशांतपदस्यरिष्फेत्यादिसूत्रेधातुपदस्योपादानादेवार्थ- लाभेसूत्रांतरनिर्माणस्यवैयर्थ्यापत्तिरिति वाच्यम् 'विपरीतंकेतोः' इतिसूत्रेकेतुकृत- व्यत्ययस्यत्रिकोणएववक्तव्यत्वात्साफल्यप्रसंगात् । अन्यथाहिदारभाग्यशूलेष्वपिके- तुकृतव्यत्ययापत्तिरितिभावः । यत्तु केश्चिदुक्तंप्राग्वदितिसूत्रस्यपृथक्करणसामर्थ्या- दप्रतिबंधयमर्गलितेत्यादिति वि-

परीतंकेतोरितिसार्वत्रिकंयदुक्तंतदपिन । कामस्थेतिसूत्रोत्तरंप्राग्वदितिसूत्रंचेत्तदा सार्वत्रिकंस्यात्प्राग्वदितिसूत्रानंतरप्रणयनात्तत्रैवास्यप्रवृत्तिरित्यर्थः । विपरीतमितिसूत्रस्योत्तरसूत्रेऽन्वय इति यदुक्तं तदपिन अष्टानांवेतिपृथक्करणसामर्थ्याद्देवराहोर्न्यूनांशत्वेनकारकत्वलाभादेतदन्वयस्यवैयर्थ्यापत्तिः अष्टानां वेत्यन्यमतंयदुक्तंतत्रप्रमाणाभाव इति ॥ ९ ॥

विपरीतंकेतोः ॥ १० ॥

केतौविशेषमाह । केतोर्ग्रहस्यनवममर्गलास्थानंपंचमंप्रतिबंधकस्थानम् ॥ १० ॥

आत्माधिकःकलादिभिर्नभोगःसप्तानामष्टानांवा ॥ ११ ॥

किंचसतिमुनेस्तात्पर्येकेतोर्लग्नस्य अस्मिन्ग्रंथेविशेषतः कारकात्फलादेशेकर्तव्ये कारकान्विवक्षुरादावात्मकारकंदर्शयति । रव्यादिशन्यंतानांसप्तानांराह्वंतानामष्टानां वामध्येयोनभोगोग्रहःकलादिभिः कलाया आदयोंशास्तैरंशैः अंशादिभिरितियावत् अधिकःस आत्मा आत्मकारक इत्यर्थः । अंशपदंविहाय कलादिपदेननिर्देशस्त्वंशसाम्येपिकलादिकाधिक्येनविनिर्णेतव्यमितिज्ञापनार्थंकलादिभिरपिसाम्येवक्ष्यमाणबलेनैकतरनिर्णयः । तत्र द्वित्र्यादिग्रहाणामंशादिसाम्येनकारकलोपेबलवत्स्थिरकारकादेवतत्तत्कारकविचारः कर्तव्यः इति । ननुआत्माधिकःकलादिभिर्नभोगोष्टानामित्येवपाठोऽस्तुलाघवात् । उच्यते । तत्राधिकपदस्यनिविष्टत्वाद्राहोस्तुसर्वग्रहांशन्यूनांशतयात्मकारकतेतिसूचनायाष्टानांवेतिपृथगुक्तिः । ननुकथं ज्ञातमितिचेत् राहोर्विपरीतसंचारान्न्यूनत्वेनाधिक्यात् नभोगोष्टानामितिपाठेत्वन्यग्रहरीत्या राहोरप्याधिक्यंप्रतीयेतद्वित्राणांग्रहाणांब्रह्मत्वयोगेप्रसक्तेराहुयोगेविपरीतमितिसूत्रेणराहोर्योगेनापिन्यूनांशस्यब्रह्मत्वं स्वस्य तु सुतरामिवाल्पांशत्वेन कारकत्वंभवतीत्यर्थः । अत्रवृद्धसंमतिः "भागाधिकःकारकःस्यादल्पभागोंतकारकः । मध्यांशोमध्यखेटः स्यादुपखेटःसएवहि" इति नचवृद्धवाक्याद्राहोर्न्युनांशकत्वेनात्मकारकत्वंनायातीति वाच्यंशास्त्रप्रसिद्धतयाबालानामपितथैवबोधाद्विविच्यनोक्तम् ।अत्रवृद्धवाक्यांतरंच"मेषाद्यसव्यमार्गेणराहुकेतूनकारकौ" अस्यार्थः राहुकेतूमेषाद्यसव्यमार्गेणसव्यंवामम्, असव्यंदक्षिणंतुअसव्यमार्गेणमेषादिक्रममार्गेणनकारकौतयोर्विपरीतमार्गेणानुभवतएवेति

फलितार्थः । अत्रराशिकृतमाधिक्यंनग्राह्यमितिसंप्रदायः । अथवाअंशादिभिर्ग्रहद्वय-साम्येसप्तमकारकाभावेराहुरपि ग्राह्यःतस्मादष्टानांवेतिगौणः कल्पोनिरुक्तः । यत्तुप्रम-निधिपंथैर्विपरीतंकेतोरितिसूत्रेदेहलीदीपकन्यायेनात्रान्वेतीत्युक्तंतदयुक्तंरव्यादिक्रम-मनादृत्यादौकेतुनिरूपणस्यायोग्यत्वात् । राहोरंशाधिक्येनकारकताकेतोस्तुन्यूनांश-त्वेनकारकतेतिबाधितत्वाच्च राहोरधिकांशत्वेसतिकेतोरपितथात्वात् नवानामितितु-कथंनोक्तमितिचेत् राहुकेत्वोरंशादिसाम्येकारकांतराभावादष्टानामित्येवोचितमित्य-लमतिविस्तरेण ॥ ११ ॥

सईष्टेबंधमोक्षयोः ॥ १२ ॥

आत्मकारकस्योत्कर्षंदर्शयति । सआत्मकारकोबंधमोक्षयोरीष्टेस्वामीभवति । नीचराशिपापयोगोच्चादिराशिशुभयोगैरितिशेषः । नीचपापयुक्तःकारकः स्वदशां-तर्दशासुबंधनादिदुःखदःस्यात् उच्चादिशुभयुतस्तुग्रहांतरबलेन बद्धस्यापिमोक्षण-कर्त्ताभवति यद्वाप्रतिकूलकःआत्मकारकःपापकर्मप्रवृत्तिद्वारासंसाररूपबंधनदः स्यात् अनुकूलस्तुज्ञानकाशीवासादिभिर्मोक्षकर्तास्यादित्यर्थः ॥ १२ ॥

तस्यानुसरणादमात्यः ॥ १३ ॥

अमात्यकारकमाह । तस्यात्मकारकस्यअनुपश्चात्सरणाद्गमनान्न्यूनांशतयाऽ-मात्यः अमात्यकारकोभवतीति ॥ १३ ॥

तस्यभ्राता ॥ १४ ॥

भ्रातृकारकमाह । तस्यामात्यकारकस्यानुसरणादल्पांशतयाभ्रातृकार-कःस्यात् ॥ १४ ॥

तस्यमाता ॥ १५ ॥

मातृकारकमाह । भ्रातृकारकादल्पांशोग्रहोमातृकारकोभवति ॥ १५ ॥

तस्यपुत्रः ॥ १६ ॥

पुत्रकारकमाह । मातृकारकान्न्यूनांशःपुत्रकारक इति ॥ १६ ॥

तस्यज्ञातिः ॥ १७ ॥

ज्ञातिकारकमाह । पुत्रकारकादल्पांशोज्ञातिकारक इति ॥ १७ ॥

तस्यदाराश्च ॥ १८ ॥

दारकारकमाह । ज्ञातिकारकान्न्यूनांशःस्त्रीकारकः । तस्यदाराइत्यनेनैवसिद्धेचकारोनुक्तसमुच्चयार्थःसमस्थिरकारकपदोपपदादिभ्योपिस्त्रीविचारःकार्य्योनतुदारकारकादेवेतिसूचयति ॥ १८ ॥

मात्रासहपुत्रमेकेसमामनंति ॥ १९ ॥

पुत्रकारकविकल्पमाह । मातृकारकात्पुत्रकारकविचारः कार्यइति केचनाचार्यावदंति कारकद्वयैक्यं वदंतीतियावत् ॥ १९ ॥

भगिन्याऽऽरतःश्यालःकनीयाञ्जननीचेति ॥ २० ॥

अथनित्यकारकान्वक्तुमुपक्रमते । तत्रादौभगिन्यादिकारकान्दर्शयति । आरतोभौमाद्भगिनीसामान्यं श्यालः स्त्रीभ्राता कनीयान्कनिष्ठभ्राता जननी माताएतेविचारणीयाइत्यर्थः ॥ २० ॥

मातुलादयोबंधवोमातृसजातीयाइत्युत्तरः ॥ २१ ॥

मातुलादिकारकमाह । उत्तरतोभौमाग्रिमाद्बुधात् मातुलभ्रातृभगिन्यादयोबंधवोमातृसजातीयामातृसपत्न्यश्चविचारणीयाः ॥ २१ ॥

पितामहःपतिपुत्राविति गुरुमुखादेवजानीयात् ॥ २२ ॥

पितामहादिकारकमाह । गुरुमुखादेवगुर्वादिभ्यएवक्रमेणपितामहपतिपुत्रा इतिजानीयाद्विचार्या इत्यर्थः । नचैवंचेदग्रिमसूत्रेपत्नीपतिःपितरावितिवाच्यं मंदात्पुत्र इतितृतीयसूत्रोपादानापेक्षयातथैवसुवचत्वात् उर्वरितंत्वग्रिमसूत्रेनिबद्धम् अन्यथामुखपदंव्यर्थमेवस्यादिति ॥ २२ ॥

पत्नीपितरौश्वशुरौमातामहाइत्यंतेवासिनः ॥ २३ ॥

पत्न्यादिषुशुक्रकारकमाह । अंतेवासिनःगुर्वग्रेपठिताच्छुक्रात् भार्यामातृपितृश्वशुरश्वश्रूपितामहाविचार्याइत्यर्थः ॥ २३ ॥

मंदोऽज्यायान्ग्रहेषु ॥ २४ ॥

ःननुकारकत्वेनद्वित्रादिग्रहसन्निपातेकमालंब्यविचारइतिसंदेहेकलाधिक्यवतस्तत्रापिसाम्येनिसर्गबलवतःकार्यइतिरीतिस्तस्माद्ग्रहाणांनिसर्गबलं सूचयति । मंदः शनिःसप्तसुग्रहेष्वज्यायान्दुर्बलः तथाचबृहज्जातके " शकुबुगुशुचराद्यावृद्धितो वीर्यवंतः " इति । तथाचनिसर्गबलेशन्यादयउत्तरोत्तरं, बलिनइत्यर्थः ॥ २४ ॥

प्राचीवृत्तिर्विषमभेषु ॥ २५ ॥

अथचरदशावर्षानयनोपयोगितयौजयुग्मराशिभेदेनगणनामुपदिशति । विषमभेषुमेषमिथुनादिराशिषुप्राचीवृत्तिःक्रमगणनास्यात् मेषवृषादिरीत्या गणनास्यादितियावत् ॥ २५ ॥

परावृत्त्योत्तरेषु ॥ २६ ॥

उत्तरेषुसमराशिषुवृषकर्कादिषुपरावृत्त्याव्युत्क्रमेणवृषमेषमीनादिक्रमेण गणनाभवतीत्यर्थः ॥ २६ ॥

नक्वचित् ॥ २७ ॥

अत्रापवादमाह । ओजराशिषुक्वचिन्नक्रमःयुग्मराशिषुक्वचिद्व्युत्क्रमोनेत्यर्थः । कुत्रेत्याकांक्षायांपरंपराश्रुतार्थेनचिरंतनैरुक्तम्—"क्रमाद्वृषेवृश्चिकेच व्युत्क्रमात्कुंभसिंहयोः" इतिसूत्रत्रयफलितार्थसंग्रहस्त्वयम् "मेषादित्रित्रिभैर्ज्ञेयं पदमोजपदक्रमात् । दशाब्दानयनेकार्यागणनाव्युत्क्रमात्समे " प्राचीवृत्तिर्विषमपदेपरावृत्त्योत्तरेइतिकथंनोक्तमितिचेत् . यावदीशाश्रयंपदमृक्षाणामितिवक्तव्यत्वात्संदेहभियानोक्तम् तथाच "मातृधर्मयोःसामान्यं विपरीतमोजकूटयोः" इति वक्तव्यत्वाच्चेति २७ ॥

नाथांताःसमाःप्रायेण ॥ २८ ॥

अथतत्तद्राशेर्दशाब्दानयनायावधिंदर्शयति । अत्रराशीनांनाथाग्रंथांतरोक्ताग्राह्याः अत्रानुक्तत्वात् । तथाहि " क्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाः सुरगुरुमंदसौरिगुरवश्चगृहांशकपाः " इति नाथानामवस्थाननैयत्येनचरदशोच्यते । कुत्रचरदशापदेनव्यवहारइतिचेत् जन्मलग्नजोर्द्धयोगार्द्धकप्रयौगाद्य । अत्रसमाः

अब्दानाथांता:तत्तद्राशीनां तत्तद्राशिनाथाश्रितराशिपर्यंताग्राह्याः इति । एवंचनाथे द्वितीयेएकाब्दस्तृतीयेद्वौ इतिक्रमेणद्वादशेनाथेएकादशाब्दाः तत्तद्राशौनाथेस्थिते सतितु द्वादशाब्दाइतिविवेकः । तदुक्तं :प्राच्यैः " तस्मात्तदीशपर्यंतंसंख्यामत्रदशां विदुः । वर्षद्वादशकंतत्रनचेदेकंविनिर्दिशेत् " अस्यार्थः तत्तद्राशौनाथे स्थितेसति द्वादशवर्षाणि असतितुएकाब्दोग्राह्यइति अतएवप्रायेणेतिपदेननाथांता:समाइत्यस्यापवादःसूचितः । प्रायेणेत्यनेनैवस्वामिनउच्चत्वनीचत्वाभ्यामेकैकवर्षवृद्धिह्रासावपि सूचितावेव वृश्चिककुंभयोर्द्विनाथत्वमपिसूचितमेव । तदुक्तंवृद्धैः " उच्चखेटस्यसद्भावेवर्षमेकंविनिक्षिपेत् । तथैवनीचखेटस्यवर्षमेकंविशोधयेत् " इति ॥ अत्रवृश्चिककुंभयोर्विशेषोवृद्धैरुक्तः " कुजसौरीकेतुराहूराजानावलिकुंभयोः । कुजसौरीकेतुराहूयुक्तौतत्र स्थितौयदि ॥ वर्षद्वादशकं तत्रनचेदेकंविनिर्दिशेत् " अयमर्थः वृश्चिकस्यकुजकेतूराजानौनतुतयोरेकैकमपि कुंभस्यशनिराहूराजानौनत्वेकैकमपि तथाचद्वयोः सत्त्वेएववर्षद्वादशकम् एकैकसत्त्वेस्वाम्यभावइवोक्तप्रकारेण दशाब्दगणनंकार्यमितिअन्यराशौतदुभयसत्त्वे नाथांताइतिरीतिरनुसर्तव्या तयोर्भिन्नभिन्नराशिगत्वेयएवनाथोबलवांस्तत्संख्याग्राह्या ॥ एतदुक्तं वृद्धैः " द्विनाथक्षेत्रयोरत्र निर्णयः कथ्यतेधुना । एकःस्वक्षेत्रगोन्यस्तुपरत्रयदिसंस्थितः ॥ तदान्यत्रस्थितं नाथंपरिगृह्यदशांनयेत् । स्वक्षेत्रे मिलितावेवस्वामिनस्त्वेकशस्तथा ॥ एकस्यस्वगृहस्थत्वंनहिकार्योपयोगिकम् । द्वावप्यन्यर्क्षगौतौचेत्सग्रहोबलवान्भवेत् । ग्रहयोगसमानत्वेर्चिंत्यंराशिबलाद्बलम् । चरस्थिरद्विस्वभावाःक्रमात्स्युर्बलशालिनः । राशिसत्त्वसमानत्वेबहुवर्षोबलीभवेत् ॥ एकःस्वोच्चगतस्त्वन्यःपरत्रयदिसंस्थितः । ग्राहयेदुच्चखेटस्थंराशिमन्यंविहायवै ॥ नाथांताइतिरीत्यायोबहुवर्षवतींदशाम् । करोतिबहुवर्षोसौस्वराशेर्दूरगःखगः ॥ एवंसर्वंसमालोच्यजातस्यनिधनंवदेत् " इति । स्पष्टार्थाःश्लोकाः । एकः स्वोच्चेत्यस्यार्थः यदितुबहुवर्षदएकोराजापरक्षेत्रगः अपरस्तुराजाऽन्यक्षेत्रगएवोच्चगोल्पवर्षदस्तदाबहुवर्षदंत्यक्त्वाऽल्पवर्षदमेवोच्चग्रहमाश्रित्यनाथांता इति रीत्याऽब्दानयनंकार्यमिति । अन्यच्चवृद्धैरुक्तम् " न्यासयोर्ग्रहहीनत्वेवैकस्यान्येनसंयुतौ । ग्राह्योराशिर्ग्रहाभावस्तत्स्वाम्युच्चंगतोयदि । एकत्र स्वर्क्षगः खेटश्चान्यत्रद्वौग्रहौयदि ॥ ग्रहद्वययुतिंहित्वाग्राहयेत्पूर्वभं सुधीः " इति । अयमर्थः । न्यासयोः अथवाद्वयोः स्थानयोः ग्रहाभावेअथवाद्वयोर्म-

ध्ये एकस्यान्येनकेनचिद्ग्रहेणस्वेशातिरिक्तेनयुतौसत्यांचतत्रयोराशिर्न्यायेन निर्बलःसराशिस्तद्राशीशेउच्चंगतेसतिबलवानेवनापरः सग्रहोपिएकत्रराशौस्वक्षेत्रगोग्रहः अपरत्रद्वौग्रहौस्तस्तदासस्वामिकराशिरेवबलवानितिद्वितीयपद्यतात्पर्यम् । उच्चराशयस्तु "अजवृषभमृगांगनाकुलीराझषवणिजौचदिवाकरादितुङ्गाः । दशशिखिमनुयुक्तिथींद्रियांशैस्त्रिनवकविंशतिभिश्चतेऽस्तनीचाः" इति । पंचमेपदक्रमात्प्राक्प्रत्यक्त्वमितिवक्ष्यमाणसूत्रात्क्रमभेदेनदशालेख्या आरंभावधिस्तु लग्नमेवचरदशायामत्र शुभः केतुरितिसुत्रादस्या दशायाश्चरदशेतिनामबोध्यम् ॥ २८ ॥

यावदीशाश्रयंपदमृक्षाणाम् ॥ २९ ॥

अथाग्रेफलविशेषज्ञापनायराशीनामारूढापरपर्यायंपदमुपदिशति । ऋक्षाणांराशीनामीशाश्रयंजावतईशाश्रयराशिपर्यंतंयासंख्यातामीशाश्रयादग्रेप्रणीयतत्संख्यायस्मित्राशौसमातातद्राशिस्तद्ग्रहस्वामिकराशेः पदंस्यादित्यर्थः । ननु ईशाश्रयादग्रे प्रणीयेत्यर्थःकथम् । उच्यते । यावच्चासावीशश्चयावदीशः यावदीशः आश्रयोयस्यतद्यावदीशाश्रयंपदमितिसमासाल्लब्धइति । तदेववृद्धैरुक्तम् " लग्नाद्यावतिथेतिष्ठेद्राशौलग्नेश्वरः क्रमात् । ततस्तावतिथंराशिं जन्मारूढंप्रचक्षते ॥ लग्नाल्लग्नपतिर्यावद्राशिसंस्थस्ततःपुनः । तावानृषिभिरारूढःकथितः सर्वशास्त्रतः ॥ यदालग्नाधिपोलग्नेसप्तमेवास्थितोयदि ॥ आरूढंलग्नमेवात्रनिर्दिशेत्कालवित्तमः" इदंचश्लोकेन लग्नपदंनिरुक्तं पदांतराणामप्युपलक्षणं बोध्यम् । श्लोकाः स्पष्टार्थाः ॥ २९ ॥

स्वस्थेदाराः ॥ ३० ॥

अथारूढोदाहरणरूपंसूत्रद्वयमाह । लग्नात्स्वस्थे चतुर्थस्थे लग्नस्वामिनि दाराः सप्तमस्थोराशिर्लग्नारूढंभवति ॥ ३० ॥

सुतस्थेजन्म ॥ ३१ ॥

लग्नात्सुतस्थेसप्तमस्थेलग्नस्वामिनिजन्मलग्नमारूढंभवतीत्यर्थः । यावदीशेतिसूत्रेणैवसिद्धे एतत्सूत्रद्वयमुदाहरणद्वारास्पष्टार्थंपठितमिति । यत्तुआद्यैः स्वस्थेदाराविचारणियाः सुतस्थेप्राणस्यकिमात्सुर्वसिवुक्तंतदसंगतमेवप्रतिभातीति ॥ ३१ ॥

सर्वत्रसवर्णाभावाराशयश्च ॥ ३२ ॥

अथात्रभावराशिबोधकपदानामन्यशास्त्रतोवैलक्षण्यमाशंक्याह । भावाराशयश्चसवर्णाः वर्णेनसहीताः सवर्णाः एकादिसंख्याबोधकाक्षरगम्याः सर्वत्र ग्रंथे । मनुसिद्धमन्यदितिवक्ष्यमाणत्वात् शिवतांडवादिग्रंथेषुकटपयादिवर्णैः सूचितसंख्याप्रसिद्धैवकिमर्थमिदंसूत्रमिति । नचभावराशिग्रहसाधारण्येनबोधः स्यादितिवाच्यम् । भावराशीनांसंख्याप्राधान्यत्वाद्ग्रहाणांतुग्रहवाचकपदप्राधान्यत्वात्साधारण्येनबोधोनस्यात्किमर्थंसर्वत्रेतिसूत्रमित्याशंक्यवर्णपदंराशिपरमेतदितिप्रकारांतरेणैतत्सूत्रंव्याख्यायते । सर्वत्रसवर्णाभावाराशयश्चभावाराशयश्चसर्वणाः वर्णेनवर्णदेन सहिताः सवर्णाभवंतिवर्णदापनप्रकारस्त्वित्थं वृद्धैरुक्तः " ओजलग्नप्रसूतानांमेषादेर्गणयेत्क्रमात् । युग्मलग्नप्रसूतानांमीनादेरपसव्यतः । मेषमीनादितोजन्मलग्नांतेगणयेत्सुधीः । तथैवहोरालग्नांतंगणयित्वाततः परम् । पुंस्त्वेनस्त्रीतयावैतेसजातीयेउभेयदि । तर्हिसंख्येयोजदीतवैजात्ये तुवियोजयेत् । मेषमिनादितः पश्चाद्योराशिः सतुवर्णदः ॥" ओजयुग्मलग्नानुरोधेनयोजनशोधनोत्तरंद्वादशाधिके रवि १२ तष्टंकृत्वायत्स्थितंतन्मेषमिनादिक्रमव्युत्क्रमगणनयायोराशिर्लभ्येतसवर्णदः राशिरिति बोध्यम् " होरालग्नभयोर्नेया दुर्बलाद्वर्णदादशा । यत्संख्योवर्णदोलग्नात्तत्तत्संख्याक्रमेणतु । क्रमव्युत्क्रमभेदेनदशास्यात्पुरुषस्त्रियोः ॥" लग्नाद्यसंख्याकोवर्णदराशिस्तत्तत्संख्याक्रमतः ओजयुग्मलग्नानुरोधेनप्रथमप्रवृत्तक्रमव्युत्क्रममर्यादयातत्तद्राशीनांदशास्यादितियथानाथांताइतिसूत्रेस्वस्वराशेर्नाथांतंवर्षाण्यानीतानितथात्रलग्नादेवस्ववर्णदपर्यंतंवर्षाण्यानेयानीतिमेषमीनादितः पूर्वोक्तरीत्याधनभावादितत्तद्भावांतगणनांविधायपूर्ववत्करणे तत्तद्भाववर्णददशाराशयोभवंतीति सर्वत्रेतिपदेनसूचितम् । नचवर्णदानयनं वर्णददशानयनंचसूत्रार्थात्नायातीतिवाच्यं सिद्धमन्यदिति सूत्रादन्यर्षिशास्त्रप्रसिद्धत्वादत्रनोक्तं प्राचीनैः संगृहीतमिति । गुलिकोपितथैवयथा वर्णदोराशिर्लग्नौजत्वभेदेनमेषमीनादिगणनयाजन्मलग्नहोरालग्नपर्यंतसंख्यावशतः समानीतस्तथैव भावलग्नमेवजन्मलग्नंविभाव्यभाववर्णदराशिरानेयइति । भावलग्नानयनंवृद्धरुक्तम् " सूर्योदयंसमारभ्यघटिकानांतुपंचकम् । प्रयातिजन्मपर्यंतंभावलग्नंतथैवच । तथासार्द्धद्विघटिकामितात्कालाद्विलग्नमात् । प्रयातिलग्नंतन्नामहो-

रालग्नंप्रचक्षते ॥" इति स्पष्टार्थौ श्लोकौ । होरालग्नस्पष्टीकरणंतुसार्द्धद्वयघटयाचे-त्रिंशदंशालभ्यंते तर्हिइष्टघटयाकिमितित्रैराशीकेनज्ञेयंभावलग्नंहोरालग्नंचजन्मलग्ना-द्गणनीयमिति । होरालग्नानयने जन्मलग्नेविषमेसतिसूर्यराशितोजन्मलग्नेसमेसतितुज-न्मलग्नाद्गणयेत् सूर्योदयमारभ्ययावत्योहोराइष्टकालपर्यंतंजातास्ताः सूर्याल्लग्नाद्वाप-रिगणनयांतिमंहोरालग्नंज्ञेयमितिप्राचीनकारिकातोयमर्थो नायातीति वर्णदराशि-तः फलमुक्तंवृद्धैः "पापदृष्टिः पापयोगोवर्णदस्यत्रिकोणके । यदि स्यात्तर्हितद्रा-शिपर्यंततस्यजीवनम् । रुद्रशूलेतथैवायुर्मरणादिनिरूप्यते । तथैववर्णदस्यापि त्रिकोणेपापसंगमे । वर्णदात्सप्तमाद्राशेःकलत्रादिविचिंतयेत् । एकादशादग्रजंतुतृ-तीयात्तुयवीयसम् । पंचमेतनुजंविद्यान्मातरंतुर्यपंचमात् । पितुस्तुनवमान्मातुः पंचमाद्वर्णदस्यतु । शूलराशिदशायांवैप्रबलायामरिष्टकम्॥" वर्णदराशेःपंचमात्प्रबल-शूलदशायांमातुररिष्टंवर्णदराशिनवमात्प्रबलशूलदशायांपितुररिष्टंजानीयादित्यर्थः ३२

नग्रहाः ॥ ३३ ॥

अत्रापवादमाह । प्रथमपक्षे भावाराशयश्चसवर्णाः संख्याबोधकाक्षरगम्याइत्यु-क्तंग्रहास्तुनप्रसिद्धपदगम्याएवेत्यर्थः । द्वितीयपक्षे भावाराशयश्चसवर्णाः वर्णदराशि-सहिताइत्युक्तं ग्रहास्तुवर्णदसहिता न तथाच भावराशिवर्णदाभवंति नग्रहाणामि-त्यर्थः ॥ ३३ ॥

यावद्विवेकमावृत्तिर्भानाम् ॥ ३४ ॥

अथांतर्दशाविभागंदर्शयति । भानांराशीनांप्रतिराशयोदशाब्दाश्चरस्थिरादिदशा-सुसिद्धास्तेषां द्वादशविभागेनद्वादशराशीनामावृत्तिर्भवति । एवंचद्वादशराशीनां वि-वेकपदबोध्यचतुश्चत्वारिंशदधिकशतसंख्याभवतीति । तदुक्तंप्राच्यैः "कृत्वार्कधा राशिदशांराशेर्भुक्तिक्रमाद्वदेत्" एवंदशांतर्दशादिकृत्वा तेनफलंवदेदिति । यत्तु उ-पस्थिततयादशारंभावधिः स्वस्वलग्नमेवेतिपंथैरुक्तंतन्न । "होरालग्नभयोर्नेयादुर्बला-द्वर्णदादशा" इतिकारिकोक्तत्वात् । एवंप्रतिराशिद्वादशद्वादशाब्दाइतिविवेकसं-ख्यामहादशाभिप्रायेणापिसिद्ध्यतीति । अयमर्थोपिसूत्रसंमतएव । एतदभिप्रायेणां-तर्दशाविभागोवृद्धैरुक्तः "एकैकभावस्यैकैकवर्षंलग्नादिकल्पयेत् । सापर्यायदशा

लग्नेयुग्मेतुव्युत्क्रमाद्वदेत् । लग्नंयुग्मंयदातर्हिसम्मुखं तस्यचादिभम् ” इतिपर्या यदशाअंतर्दशेति यदालग्नंयुग्मराशिस्तदातस्यसंमुखमादिराशिः यथावृषभस्यमेष-इति ॥ ३४ ॥

होरादयः सिद्धाः ॥ ३५ ॥

प्रकृतशास्त्रेवक्ष्यमाणसूत्रेक्वचिद्धोराद्रेष्काणाद्यपेक्षासत्त्वेनतदाकांक्षांनिवर्तयन्नाह । होराद्रेष्काणादयःसिद्धाःशास्त्रांतरप्रसिद्धमेषादिगणनयाप्रसिद्धानतुदृष्टयर्गलावद्गुप्ताः । तदुक्तंवृद्धैः “राशेरर्द्धंभवेद्धोराताश्चतुर्विंशतिः स्मृताः । मेषादितासांहोराणांपरिवृत्तिद्वयंभवेत् । राशित्रिभागाद्रेष्काणास्तेचषट्त्रिंशदीरिताः । परिवृत्तित्रयंतेषांमेषादेः क्रमशोभवेत् । सप्तांशकास्त्वोजगृहेगणनीयानिजेशतः । युग्मराशौतु विज्ञेयाःसप्तमर्क्षाधिनायकात् । नवांशेशाश्चरेतस्मात्स्थिरेतन्नवमादितः । उभयेतत्पंचमादेरितिचिंत्यंविचक्षणैः । द्वादशांशस्यगणनांतत्तत्क्षेत्राद्विनिर्दिशेत् ॥ ” इति । वस्तुतस्तुराशिप्राधान्याद्विलक्षण एवेतिध्येयम् ॥ ३५ ॥

इति प्रथमाध्याये प्रथमः पादः ॥ १ ॥

इतिश्रीज्योतिर्विन्नीलकंठविरचितायांजैमिनीयसूत्रव्याख्यायांसुबो-

धिन्यांप्रथमाध्यायस्यप्रथमःपादः ॥ १ ॥

अथ स्वांशो ग्रहाणाम् ॥ १ ॥

अथात्मकारकाश्रयनवांशमालंब्यफलानिवक्तुमुपक्रमते । अत्रकारकांशमधिकरोति । अथानंतरंग्रहाणांरव्यादीनांमध्येस्वांशः आत्मकारकाश्रितोयोंशोनवांशस्तस्मात्फलविचार्य्यमित्यर्थः ॥ १ ॥

पंचमूषिकमार्जाराः ॥ २ ॥

कारकाश्रितमेषादिनवांशफलान्याह । मेषःकारकांशेमूषिकमार्जाराद्दुःखद्भवंतीति ॥ २ ॥

तत्र चतुष्पादः ॥ ३ ॥

वृषःकारकांशश्चेच्चतुष्पादःसुखदाभवंति । मूषिकादयोदुःखदाश्चतुष्पादः सुखदा इत्यत्रैकरूपतयार्थोऽपेक्षितः । कुतस्तुभिन्नरूपेणात्रबीजंकिमुच्यते वृद्धवाक्यमेवबीजं वृद्धवाक्यंतु " वृषतौल्यंशकगतेतस्मिन्वाणिज्यवान्भवेत् ।। मेषसिंहांशकगतेब्रूयान्मूषकदंशनम् ॥ कारकेकार्मुकांशस्थे वाहनात्पतनंभवेत् " इति ॥ ३ ॥

मृत्यौ कंडूः स्थौल्यं च ॥ ४ ॥

मिथुनेकारकांशेकंडूः शरीरस्थौल्यंचभवति ॥ ४ ॥

दूरे जलकुष्ठादिः ॥ ५ ॥

कर्केस्वांशेजलभयंकुष्ठरोगोभवति ॥ ५ ॥

शेषाः श्वापदानि ॥ ६ ॥

सिंहांशश्चेच्छ्वापदानिशुनकादयोदुःखदाभवंति ॥ ६ ॥

मृत्युवज्जायाग्निकणश्च ॥ ७ ॥

कन्याकारकांशश्चेन्मृत्युवन्मिथुनांशवद्भयति अग्निकणश्चअग्निकणेन दुःखदश्चभवति ॥ ७ ॥

लाभे वाणिज्यम् ॥ ८ ॥

तुलाकारकांशेवाणिज्यवान्स्यात् ॥ ८ ॥

अत्र जलसरीसृपाः स्तन्यहानिश्च ॥ ९ ॥

अत्रवृश्चिकांशेजलसर्पादयोदुःखदाभवंति मातुःस्तन्यंदुग्धंचशुष्यति ॥ ९ ॥

समे वाहनादुच्चाच्च क्रमात्पतनम् ॥ १० ॥

धनुषिकारकांशेवाहनादूर्ध्वप्रदेशाच्चक्रमात्किंचिद्वस्तुसंलग्नतयापतनंभवति न झटितीत्यर्थः ॥ १० ॥

जलचरखेचरखेटकंडूदुष्टग्रंथयश्च रिःफे ॥ ११ ॥

मकरेकारकांशेजलचरामत्स्यादयः खेचराःपक्षिणः खेटाग्रहाएतेफलदा भवंति कंडूदुष्टग्रंथिरोगाश्चभवंति दुष्टग्रंथिर्गंडादिकम् ॥ ११ ॥

तडागादयो धर्मे ॥ १२ ॥

कुंभेकारकांशेतडागादयः तडागवापीकूपादिकर्त्तारोभवंति ॥ १२ ॥

उच्चे धर्मनित्यताकैवल्यं च ॥ १३ ॥

मीनेकारकांशेधर्मनित्यत्वंकैवल्यंमुक्तिश्चभवति । कारकस्यांशादिगुणैः फलंवृद्धैः संगृहीतम् " शुभराशौशुभांशेवाकारकांशेधनीभवेत् । तदंशकेंद्रेषुशुभेराजानूनंप्रजायते ॥ कारकेशुभराश्यंशेलग्नांशस्थेशुभग्रहे । उपग्रहस्यपाश्चात्येस्वोच्चस्वर्क्षशुभर्क्षगे ॥ पापदृग्योगरहितेकैवल्यंतस्यनिर्दिशेत् । मिश्रेमिश्रंविजानीयाद्विपरीतेविपर्ययः ॥ " तदंशकेंद्रेषुकारकाश्रितांशकुण्डल्यांकेंद्रेष्वित्यर्थः । पाश्चात्ये अंत्यग्रहे इत्यर्थः । मिश्रेपापशुभदृग्योगेमिश्रंस्वर्गवासः विपरीतेपापमात्रदृग्योगसाहित्येविपर्ययः नमुक्तिर्नस्वर्गवास इति " चंद्रभृग्वारवर्गस्थेकारकेपारदारिकः ॥ वृषतौल्यंशकगते तस्मिन्वाणिज्यवान्भवेत् ॥ मेषसिंहांशकेतस्मिन्ब्रूयान्मूषिकदंशनम् ॥ कारकेकार्मुकांशस्थेवाहनात्पतनं भवेत् " ॥ १३ ॥

तत्र रवौ राजकार्यपरः ॥ १४ ॥

अथकारकांशेग्रहस्थित्यादिनाफलान्युपदिशति ॥ कारकांशेसूर्येसतिराजकार्यतत्परोभवति ॥ १४ ॥

पूर्णेंदुशुक्रयोर्भोगी विद्याजीवी च ॥ १५ ॥

कारकांशेपूर्णेंदुशुक्रयोःसतोर्भोगीविद्याजीवीचस्यात् ॥ १५ ॥

धातुवादी कौंतायुधो वह्निजीवी च भौमे ॥ १६ ॥

कारकांशेभौमेसतिधातुवादीरसायनविद्यावान् बर्छीतिभाषयाप्रसिद्धायुधः वह्निकृतजीवनश्च स्यात् ॥ १६ ॥

वणिजस्तंतुवायाः शिल्पिनोव्यवहारविदश्च सौम्ये ॥ १७ ॥

कारकांशेबुधेसतिवणिक्प्रभृतयोभवंति ॥ १७ ॥

कर्मज्ञाननिष्ठा वेदविदश्च जीवे ॥ १८ ॥

कारकांशेगुरौसतिकर्मनिष्ठादयोभवंति ॥ १८ ॥

राजकीयाः कामिनःशतेंद्रियाश्च शुक्रे ॥ १९ ॥

कारकांशेशुक्रेसतिराजाधिकारवंतः बहुस्त्रीस्पृहालवः शतवर्षजीविनश्च भवंति शतंशतवर्षमिंद्रियाणियेषामितिस्वामिनः । पंथास्तुशतानिइंद्रियाणियेषामितिवदंति तन्न इंद्रियाणांशतत्वादर्शनात् ॥ १९ ॥

प्रसिद्धकर्माजीवः शनौ ॥ २० ॥

कारकांशेशनौसतिलोकप्रसिद्धकर्मणाजीवेदित्यर्थः ॥ २० ॥

धानुष्काश्चोराश्च जांगुलिका लोहयंत्रिणश्च राहौ ॥ २१ ॥

कारकांशेराहौसतिधानुष्काश्चौराश्चस्युः किंवा जांगुलिकाः विषवैद्याः लोहयंत्रिणश्चस्युः । वैकल्पिकमिदंफलद्वयंकथमवगतमितिचेत् मध्येचकारोपादानादेव अन्यसूत्रेष्वंत्यएवचकारउपात्तः अत्रमध्येकिमर्थमिति ॥ २१ ॥

गजव्यवहारिणश्चोराश्च केतौ ॥ २२ ॥

कारकांशेकेतौफलमिदम् ॥ २२ ॥

रविराहुभ्यां सर्पनिधनम् ॥ २३ ॥

कारकांशेरविराहुस्थित्यासर्पान्मृतिर्भवति ॥ २३ ॥

शुभदृष्टे तन्निवृत्तिः ॥ २४ ॥

शुभग्रहावलोकितेरविराहुयोगेसर्पान्मृतिर्नस्यात् ॥ २४ ॥

शुभमात्रसंबंधाज्जांगुलिकः ॥ २५ ॥

कारकांशगयोरविराह्वोः शुभमात्रयोगेसति जांगुलिकोविषवैद्योभवेत् मात्रशब्देनपापनिवृत्तिः ॥ २५ ॥

कुजमात्रदृष्टे गृहदाहकोऽग्निदो वा ॥ २६ ॥

कारकांशगयोरविराह्वोःकुजदृष्टौसत्यांस्वगृहदाहकोऽग्निदोवाभवति ॥ २६ ॥

शुक्रदृष्टेर्न दाहः ॥ २७ ॥

कारकांशगतरविराह्वोःशुक्रदृष्टौसत्यांगृहदाहोनस्यात् किन्तु अग्निदानमात्रं करोतीत्यर्थः ॥ २७ ॥

गुरुदृष्टेस्त्वासमीपगृहात् ॥ २८ ॥

कारकांशगयोरविराह्वोः गुरुदृष्टौसत्यांशुक्रदृष्टावसत्यामासमीपगृहात्समीपगृहपर्यंतंदाहःस्यात् नस्वगृहमात्रस्य ॥ २८ ॥

सगुलिकेविषदोविषहतोवा ॥ २९ ॥

कारकांशे गुलिकसहितेसतिपरस्मैविषदातावास्वयंविषहतःस्यात् । गुलिकानयनप्रकारस्तुवृद्धैरुक्तः " रविवारादिशन्यन्तंगुलिकादिनिरूप्यते । दिवसानष्टधाकृत्वावारेशाद्गणयेत्क्रमात् ॥ अष्टमोंशोनिरीशःस्याच्छन्यंशोगुलिकःस्मृतः । रात्रिमप्यष्टधाभक्त्वावारेशात्पंचमादितः ॥ गणयेदष्टमःखंडोनिष्पत्तिः परिकीर्तितः । शन्यंशेगुलिकःप्रोक्तोगुर्वंशेयमघंटकः ॥ भौमांशेमृत्युरादिष्टोरव्यंशे कालसंज्ञकः । सौम्यांशेऽर्द्धप्रहरकः स्पष्टकर्मप्रदेशकः ॥" रव्यादिसप्तवारेषुदिनमानमष्टधाविभज्यतत्तद्वारेशकंप्रथमखंडाधिपंकृत्वाऽग्रिमखंडेषुतत्तद्वारेशादग्रिमग्रहात्क्रमेणेशत्वेनजानीयादष्टमःखंडस्तुनिरीशः एवंचसप्तसुवारेषुशन्यंशोगुलिकनामातथाचरविवारे सप्तमः सोमेषष्ठः भौमेपंचमः बुधेचतुर्थः गुरौ तृतीयः शुक्रेद्वितीयः शनौप्रथमः खंडोगुलिकाभवंति । सप्तस्वपिवारेषुरात्रिमानमष्टधाविभज्य तद्वारेशात्पंचमाद्याःखंडाधिपाज्ञेयाः । रात्रावप्यष्टमखंडोनिरीशःएवंचरविरात्रौतृतीयःखंडः सोमेद्वितीयः भौमे प्रथमः बुधेसप्तमः गुरौ षष्ठः शुक्रेपंचमः शनौ चतुर्थःखंडो गुलिकाभवंति एवंसर्वेषु दिनेषु रात्रौचगुरुखंडोयमघंटनामाबुधखंडोऽर्द्धप्रहरकाख्यःरव्यंशःकालसंज्ञो भौमांशोमृत्युनामेतिज्ञेयम् । स्पष्टकर्मइति । गुलिकादीनां स्पष्टीकरणंतु स्वस्वदेशलग्नप्रमाणानुसारेण तत्तत्खंडकालांतलग्नानिस्पष्टानिकृत्वा गुलिकादिस्पष्टलग्नेकस्यांशोस्तिसएवकारकांशश्चेत्सगुलिकोजातइतिविवेचनीयम् । तथाचसंग्रहः- " तथाचरविवारादौदिनेगुलिकसंस्थितिः ॥ सप्तर्तुशरवेदत्रिद्विकुखंडेषुहिक्रमात् ॥ रात्रौत्रिद्विकुसप्तर्तुपंचतुर्येषुतत्स्थितिः " इति ॥ २९ ॥

चंद्रदृष्टौचौराऽपहृतधनश्चौरोवा ॥ ३० ॥

सगुलिकेकारकांशेचंद्रदृष्टौसत्यां चौरैर्नीतधनः स्वयमेववाचौरः स्यात् ॥ ३० ॥

बुधमात्रदृष्टे बृहद्बीजः ॥ ३१ ॥

सगुलिकेकारकांशेऽन्यग्रहादृष्टत्वेसतिबुधदृष्टेस्थूलवृषणोभवति ॥ ३१ ॥

तत्र केतौ पापदृष्टे कर्णच्छेदः कर्णरोगो वा ॥ ३२ ॥

सगुलिकेइतिपदंनिवृत्तंतत्रकारकांशेनवांशकुण्डल्यांकेतौसतिपापदृष्टे कर्णच्छेदः कर्णरोगोवाभवति ॥ ३२ ॥

शुक्रदृष्टे दीक्षितः ॥ ३३ ॥

सकेतौकारकांशेशुक्रदृष्टेसतिकयाचिद्यज्ञक्रिययादीक्षितः स्यात् ॥ ३३ ॥

बुधशनिदृष्टेनिर्वीर्य्यः ॥ ३४ ॥

सकेतौकारकांशेबुधशनिदृष्टेनपुंसकःस्यात् ॥ ३४ ॥

बुधशुक्रदृष्टे पौनःपुनिको दासीपुत्रो वा ॥ ३५ ॥

सकेतौकारकांशेबुधशुक्रदृष्टेपुनःपुनरुक्तवचनवक्तादासीपुत्रोवास्यात् ॥ ३५ ॥

शनिदृष्टे तपस्वी प्रेष्यो वा ॥ ३६ ॥

सकेतौकारकांशेखेटांतरेणदृष्टेऽपिशनिदृष्टेतपस्वीप्रेष्योवास्यात् ॥ ३६ ॥

शनिमात्रदृष्टे संन्यासाभासः ॥ ३७ ॥

सकेतौकारकांशेखेटांतरेणादृष्टेसंन्यासाभासः : नपूर्णसंन्यासइत्यर्थः । केताविति निवृत्तम् ॥ ३७ ॥

तत्र रविशुक्रदृष्टे राजप्रेष्यः ॥ ३८ ॥

कारकांशेरविशुक्राभ्यांदृष्टेराजभृत्योभवति ॥ ३८ ॥

रिष्फेबुधेबुधदृष्टेवामन्दवत् ॥ ३९ ॥

अथकारकांशाद्दशमांशमवलंब्यविचारयति । कारकांशाद्दशमेबुधेसति बुधदृष्टे वासतिमंदवत्शनिवत् प्रसिद्धकर्माजीवःशनावितिसूत्रोपात्तफलंभवतीति ॥ ३९ ॥

शुभदृष्टेस्थैर्यः ॥ ४० ॥

कारकांशाद्दशमेबुधेतरशुभग्रहदृष्टेस्थिरोभवति नचंचलः बुधेतरशुभदृष्टत्वंकथं ज्ञातमितिचेद्बुधदृष्टिफलस्योक्तत्वादेव ॥ ४० ॥

रवौगुरुमात्रदृष्टेगोपालः ॥ ४१ ॥

कारकांशाद्दशमे [illegible] गुरुमात्रदृष्टेगोरक्षकोभवति ॥ ४१ ॥

दारेचंद्रशुक्रदृग्योगात्प्रासादः ॥ ४२ ॥

कारकांशाच्चतुर्थफलमाह । कारकांशाच्चतुर्थेचन्द्रशुक्रदृष्टियोगाभ्यांप्रासादवान् भवति ॥ ४२ ॥

उच्चग्रहेपि ॥ ४३ ॥

कारकांशाचतुर्थस्थितेउच्चराशिगतग्रहेपिप्रासादवान्भवति ॥ ४३ ॥

राहुशनिभ्यांशिलागृहम् ॥ ४४ ॥

कारकांशाच्चतुर्थस्थितेराहुशनिभ्यांशिलानिर्मितंगृहंभवति ॥ ४४ ॥

कुजकेतुभ्यामैष्टकम् ॥ ४५ ॥ गुरुणा दारवम् ॥ ४६ ॥ तार्णं रविणा ॥ ४७ ॥

इदंसूत्रत्रयंराहुशनिभ्यामितिसूत्रेणैवकृतव्याख्यानम् ॥ ४५ ॥ ४६ ॥ ४७ ॥

समे शुभदृग्योगाद्धर्मनित्यः सत्यवादी गुरुभक्तश्च ॥ ४८ ॥

अथकारकांशान्नवमांशफलमाह । कारकांशान्नवमेशुभदृष्टियोगाभ्यांधर्मनित्यत्वादिमान्भवति ॥ ४८ ॥

अन्यथा पापैः ॥ ४९ ॥

नवमेपापदृष्टियोगाभ्यांधर्मनित्यत्वादिरहितोभवति ॥ ४९ ॥

शनिराहुभ्यां गुरुद्रोहः ॥ ५० ॥

नवमस्थाभ्यांशनिराहुभ्यांतद्दृष्टिभ्यांवागुरुद्रोहः ॥ ५० ॥

गुरुरविभ्यां गुरावविश्वासः ॥ ५१ ॥

नवमेगुरुरविदृग्योगाभ्यांगुरावविश्वासोभवति ॥ ५१ ॥

तत्र भृग्वंगारकवर्गे पारदारिकः ॥ ५२ ॥

कारकांशान्नवमेशुक्रभौमान्यतरषड्वर्गेसतिपरस्त्रीसक्तःस्यात् ॥ ५२ ॥

दृग्योगाभ्यामधिकाभ्यामामरणम् ॥ ५३ ॥

नवमेशुक्रभौमान्यतरषड्वर्गेसतिषड्वर्गापेक्षयाऽधिकाभ्यांशुक्रभौमदृष्टियोगाभ्यां-

मरणपर्यंतंपारदारिकोभवति ॥ ५३ ॥

केतुना प्रतिबन्धः ॥ ५४ ॥

कारकांशान्नवमेकेतोर्दृष्टियोगाभ्यांप्रतिबन्धः आमरणंपारदारिकत्वस्यनिवृत्तिर्भवति ॥ ५४ ॥

गुरुणा स्त्रैणः ॥ ५५ ॥

नवमस्थितेननवमद्रष्ट्रावागुरुणास्त्रीलोलः ॥ ५५ ॥

राहुणार्थनिवृत्तिः ॥ ५६ ॥

नवमस्थेननवमद्रष्ट्रावाराहुणापरस्त्रीसंगनिवृत्तिर्द्रव्यनाशःस्यात् ॥ ५६ ॥

लाभे चंद्रगुरुभ्यां सुंदरी ॥ ५७ ॥

अथकारकांशात्सप्तमफलमाह । अत्र दक्पदंनिवृत्तं नवमप्रकरणस्यसमाप्तत्वात् । कारकांशात्सप्तमेचंद्रगुर्वोर्योगेसतिस्त्रीसुंदरीभवति ॥ ५७ ॥

राहुणा विधवा ॥ ५८ ॥

सप्तमेराहुयोगेविधवास्त्रीगृहेभवति ॥ ५८ ॥

शनिना वयोधिका रोगिणी तपस्विनी वा ॥ ५९ ॥

स्पष्टम् ॥ ५९ ॥

कुजेनविकलांगी ॥ ६० ॥

अलक्षणांगीत्यर्थः ॥ ॥ ६० ॥

रविणा स्वकुले गुप्ता च ॥ ६१ ॥

सप्तमेरवियोगेस्वकुले भर्तृकुलेगुप्तारक्षितास्थितास्यादामरणंनतुस्वातंत्र्येणेतस्ततोऽटनशीलाचकाराद्विकलांगीच ॥ ६१ ॥

बुधेन कलावती ॥ ६२ ॥

गीतवाद्यादिषु कुशला ॥ ६२ ॥

चापे चंद्रेणावृते देशे ॥ ६३ ॥

कारकांशाच्चतुर्थेचंद्रेसतिपूर्वोक्तयोगेषुसत्सु अनाच्छादितेदेशेप्रोक्तः स्त्रीप्रथमसंगइत्यर्थः । कारकांशात्सप्तमेधनुषिचंद्रे इतिवार्थः ॥ ६३ ॥

कर्मणि पापे शूरः ॥ ६४ ॥

कारकांशात्तृतीयफलमाह । कारकांशात्तृतीयेपापेसतिशूरःस्यात् ॥ ६४ ॥

शुभे कातरः ॥ ६५ ॥

तृतीयेशुभेकातरः ॥ ६५ ॥

मृत्युचिंतयोः पापे कर्षकः ॥ ६६ ॥

तृतीयषष्ठयोःफलमाह । कारकांशात्तृतीयषष्ठयोर्द्वयोरपिसपापत्वेकृषीवलः स्यात् ॥ ६६ ॥

समे गुरौ विशेषेण ॥ ६७ ॥

नवमे गुरौ विशेषेण कृषीवलः ॥ ६७ ॥

उच्चे शुभे शुभलोकः ॥ ६८ ॥

अथकारकांशाद्द्वादशेफलमाह । द्वादशेशुभेसतिशुभलोकप्राप्तिः ॥ ६८ ॥

केतौ कैवल्यम् ॥ ६९ ॥

कारकांशेशुभेसतिमुक्तिरित्यर्थः । अथवाकारकांशाद्द्वादशेकेतौसति मुक्तिरितिवार्थः ॥ ६९ ॥

क्रियचापयोर्विशेषेण ॥ ७० ॥

करकांशेमेषेधनुषिवातत्रशुभेसतिविशेषेणमुक्तिः सायुज्यमुक्तिरित्यर्थः । अथवा मेषेधनुषिवाद्वादशेकेतौसतिसायुज्यमुक्तिरिति । वस्तुतस्तुशुभापेक्षयाकेतोः सायुज्यमुक्तिदातृत्वायोग्यत्वात्प्रथमव्याख्यैवसमुचितेति बोध्यम् । नचसूत्रकारेणकेतोः शुभत्वमुक्तंकेतोश्चेच्छुभत्वंस्यात्तर्हिचरदशायामत्रशुभःकेतुरितिवक्ष्यमाणसूत्रोत्तरदशायामेवशुभःकेतुरन्यत्रनेत्यर्थोऽवगम्यत इति ॥ ७० ॥

पापैरन्यथा ॥ ७१ ॥

कारकांशाद्द्वादशेकारकांशेचपापयोगेन नशुभलोकोनमुक्तिरित्यर्थः ॥ ७१ ॥

रविकेतुभ्यां शिवे भक्तः ॥ ७२ ॥

अमात्यदासेचैवमितिपर्यंतंकेतावितिपदमनुवर्तते । कारकांशेरविकेतुभ्यां मिलिताभ्यांस्थिताभ्यांशिवेभक्तिर्भवति । अग्रेप्येवमेवयोजना ॥ ७२ ॥

चंद्रेण गौर्य्याम् ॥ ७३ ॥ शुक्रेण लक्ष्म्याम् ॥ ७४ ॥
कुजेन स्कंदे ॥ ७५ ॥ बुधशनिभ्यां विष्णौ ॥ ७६ ॥
गुरुणा सांबशिवे॥७७॥राहुणा तामस्यां दुर्गायां च७८॥

एवंस्पष्टम् ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

केतुना गणेशेस्कन्देच ॥ ७९ ॥

तामस्यांभूतादिदेवतायांचेति ॥ ७९ ॥

पापर्क्षे मंदे क्षुद्रदेवतासु ॥ ८० ॥

कारकांशेपापराशौशनौसतिकर्णपिशाचादिषुभक्तिः ॥ ८० ॥

शुक्रेच ॥ ८१ ॥

कारकांशेपापराशौशुक्रेतथैवच ॥ ८१ ॥

अमात्यदासेचैवम् ॥ ८२ ॥

आत्मकारकग्रहान्न्यूनांशोग्रहः अमात्यस्तस्माद्योदासोरव्यादिगणनयाषष्ठोग्रहस्तस्मिन्पापर्क्षेकारकांशेसतिक्षुद्रदेवताभक्तिरित्यर्थः । पंथास्तु अयमर्थः सूत्रसंमतश्चेत्पापर्क्षेमंदशुक्रामात्यदासेषुक्षुद्रदेवतास्वितिसूत्रंप्रणीतं स्यादिति वंदति । तन्न । एवंचेन्मंदशुक्रामात्यदासेषुमिलितेषुपापर्क्षेषुसत्सुक्षुद्रदेवताभक्तिरित्यर्थःस्यात् । भवतुएतेषामन्यतरस्यापिपापर्क्षेस्थित्याक्षुद्रदेवताभक्तिस्तस्माद्योगविभाग एवोचित इति ॥ ८२ ॥

त्रिकोणे पापद्वये मांत्रिकः ॥ ८३ ॥

कारकांशात्पंचमनवमयोःपापद्वयेक्रमेणस्थितेसतिमांत्रिकः मंत्रवेत्ताभवति ८३॥

पापदृष्टे निग्राहकः ॥ ८४ ॥

त्रिकोणद्वयेसपापेपापदृष्टेभूतादीनांनिग्रहकर्तास्यात् ॥ ८४ ॥

शुभदृष्टेऽनुग्राहकः ॥ ८५ ॥

त्रिकोणद्वयेशुभदृष्टेऽनुग्राहकःत्रिकोणेसपापेशुभदृष्टेऽनुग्राहकः लोकेषुअनुग्रहकर्तास्यात् ॥ ८५ ॥

शुक्रेंदौ शुक्रदृष्टे रसवादी ॥ ८६ ॥

कारकांशेचंद्रेशुक्रदृष्टेसतिरसवादीभवति ॥ ८६ ॥

बुधदृष्टे भिषक् ॥ ८७ ॥

शुक्रेंदौबुधदृष्टेसतिवैद्योभवति ॥ ८७ ॥

चापे चंद्रे शुक्रदृष्टे पांडुश्वित्री ॥ ८८ ॥

कारकांशाच्चतुर्थेचंद्रेशुक्रदृष्टेसतिश्वेतकुष्ठीभवति ॥ ८८ ॥

कुजदृष्टे महारोगः ॥ ८९ ॥

चापगेचंद्रेकुजदृष्टेमहारोगःकुष्ठीभवति ॥ ८९ ॥

केतुदृष्टे नीलकुष्ठम् ॥ ९० ॥

अर्थःप्राग्वत् ॥ ९० ॥

तत्र मृतौ वा कुजराहुभ्यां क्षयः ॥ ९१ ॥

कारकांशाच्चतुर्थेपंचमेवायथायोगंकुजराहूचेत्स्तस्तर्हिक्षयरोगोभवति ॥ ९१ ॥

चंद्रदृष्टौ निश्चयेन ॥ ९२ ॥

उक्तस्थानगयोःकुजराह्वोश्चंद्रदृष्टौसत्यांनिश्चयेनक्षयरोगः चंद्रदृष्ट्यभावे क्षयः स्वल्पःचंद्रदृष्टौप्रबलइतिभावः ॥ ९२ ॥

कुजेन पिटिकादिः ॥ ९३ ॥

तत्र मृतौवास्थितेनकुजेनपिटिकादिर्भवति ॥ ९३ ॥

केतुना ग्रहणी जलरोगो वा ॥ ९४ ॥

तत्रमृतौवाकेतुश्चेत्संग्रहणीजलोदराद्यारोगाभवन्ति ॥ ९४ ॥

राहुगुलिकाभ्यां क्षुद्रविषाणि ॥ ९५ ॥

तत्रमृतौवाराहुगुलिकौयदितर्हिमूषिकादिविषाणिभवंति ॥ ९५ ॥

तत्र शनौ धानुष्कः ॥ ९६ ॥

मृतौत्रिति निवृत्तम् । कारकांशेचतुर्थेशनौधनुषिनिपुणः ॥ ९६ ॥

केतुना घटिकायंत्री ॥ ९७ ॥

तत्रकेतुश्चेद्घटिकायंत्रीभवति ॥ ९७ ॥

बुधेन परमहंसो लगुडी वा ॥९८॥राहुणा लोहयंत्री॥९९॥ रविणा खड्गी ॥ १०० ॥ कुजेन कुंती ॥ १०१ ॥

तत्रबुधेसतिपरमहंसोलगुडीवा ॥ अत्रसर्वत्रापितत्रेतिपदमन्वेति ॥ ९८ ॥ ॥ ९९ ॥ १०० ॥ १०१ ॥

मातापित्रोश्चंद्रगुरुभ्यां ग्रंथकृत् ॥ १०२ ॥

कारकांशेतत्पंचमांशेवायथायोगंचंद्रगुरूचेद्ग्रंथकर्त्ताभवति ॥ १०२ ॥

शुक्रेण किंचिदूनम् ॥ १०३ ॥

कारकांशेतत्पंचमेवाचंद्रशुक्राभ्यांकिंचिदूनंग्रंथकर्तृत्वंस्यात् । ननुअयमर्थस्त्वयाकथंलब्धइतिचेत्केवलशुक्रेणाग्रेफलस्यवक्तव्यत्वात् । न च ग्रंथकर्तृत्वेकिंचिदूनत्वकव्यादित्वंचभवतीतिवाच्यम् । एवंचेत्शुक्रेणकिंचिदूनंग्रंथकृत्कविर्वाग्मीकाव्यज्ञश्चेतिसूत्रंप्रणीतंस्यात् । तस्मादयमेवार्थः सूत्रसंमतः । नचसमासांतःपतितपदानामेकांशानुवृत्तेरनौचित्यमितिवाच्यम् । अस्मिग्रंथेत्वियंरीतिरस्त्येवेति ॥ १०३ ॥

बुधेन ततोपि ॥ १०४ ॥

कारकांशेतत्पंचमेवाचंद्रबुधाभ्यांशुक्रयोगापेक्षयापिन्यूनग्रंथकर्तृत्वं स्यात् १०४

शुक्रेण कविर्वाग्मी काव्यज्ञश्च ॥ १०५ ॥

मातापित्रोरेकत्रानुक्तयोगेकव्यादिःस्यात् ॥ १०५ ॥

गुरुणा सर्वविद् ग्रंथिकश्च ॥ १०६ ॥

अर्थःपूर्ववत् ॥ १०६ ॥

न वाग्मी ॥ १०७ ॥

वक्तृत्वंनेत्यर्थः ॥ १०७ ॥

विशिष्यवैयाकरणोवेदवेदांगविच्च ॥ १०८ ॥

पुनरपिगुरोरेवफलमाह । स्पष्टम् ॥ १०८ ॥

सभाजडः शनिना ॥ १०९ ॥

उक्तस्थानगेनमंदेनसभाजाड्यम् ॥ १०९ ॥

बुधेन मीमांसकः ॥ ११० ॥

स्पष्टम् ॥ ११० ॥

कुजेन नैयायिकः ॥ १११ ॥

स्पष्टम् ॥ १११ ॥

चंद्रेण सांख्ययोगज्ञः साहित्यज्ञो गायकश्च ॥ ११२ ॥

स्पष्टम् ॥ ११२

रविणा वेदांतज्ञो गीतज्ञश्च ॥ ११३ ॥

स्पष्टम् ॥ ११३ ॥

केतुनागणितज्ञः ॥ ११४ ॥

स्पष्टंसूत्रम् ॥ ११४ ॥

गुरुसंबंधेनसंप्रदायसिद्धिः॥ ११५ ॥

पूर्वोक्तयोगेगुरुदृष्टिगुरुषड्वर्गसंबंधेसतितत्तच्छास्त्रसंप्रदायज्ञोभवति ॥ ११५ ॥

भाग्येचैवम् ॥ ११६ ॥

कारकांशाद्द्वितीयेपिचंद्रगुर्वादिपूर्वोक्तयोगेनग्रंथकर्तृत्वादिपूर्वोक्तंफलं स्यादि-
त्यर्थः ॥ ११६ ॥

सदाचैवमित्येके ॥ ११७ ॥

कारकांशात्तृतीयेपिपूर्वोक्तग्रहयोगेनग्रंथकर्तृत्वादिफलमूह्यमित्येके ॥ ११७ ॥

भाग्येकेतौपापदृष्टेस्तब्धवाक् ॥ ११८ ॥

कारकांशाद्द्वितीयेकेतौपापदृष्टेसतिस्तब्धवाक्[illegible] किंवा प्रत्युत्तर-
दानेझटित्यसमर्थवाणीकःस्यात् ॥ ११८ ॥

स्वपितृपदाद्भाग्यरोगयोः पापेसाम्येकेमद्रुमः ॥ ११९ ॥

स्वकीयजन्मलग्नाजन्मलग्नारूढाद्वाद्वितीयाष्टमयोराश्योः केवलौपापौस्तः सग्रहत्वेपिशुभपापान्यतरैकग्रहत्वेनद्विग्रहवत्त्वादिनासमसंख्यौचेत्स्तस्तदा केमद्रुमयोगोभवति। ननुस्वशब्देनकारकांशबोधःकथंन उच्यते स्वशब्दः कारकांशबोधकश्चेत्पितृपदादितिवाक्यादेवतल्लाभेपुनरुपादानंव्यर्थंस्यात्। स्वशब्दाभावेपितृपदात्कारकांशात्कारकांशारूढादयमर्थःस्यात्। अपेक्षितस्तुजन्मलग्नाल्लग्नारूढाद्वेति। स्वशब्देनतुस्वीयलग्नाल्लग्नारूढाद्वेत्यर्थोभवतीति। अयमेवार्थः परंपराश्रुतत्वात्प्राचीनैरुक्तः—"आरूढाजन्मलग्नाद्वापापौस्त्रीहानिगौयदि। केवलौसग्रहत्वेपिसमसंख्यौशुभाशुभौ॥ चंद्रदृष्टौविशेषेणयोगःकेमद्रुमोमतः॥" इति यत्तुकारकलग्नरूढेभ्यइतिस्वामिभिरुक्तं तद्वृद्धसंमतंनेति॥ ११९॥

चंद्रदृष्टौविशेषेण ॥ १२० ॥

प्रोक्तयोगेसतिद्वितीयाष्टमयोश्चंद्रदृष्टौसत्यांविशेषेणकेमद्रुमोदारिद्र्ययोगोभवति १२०

सर्वेषांचैवंपाके ॥ १२१ ॥

ननुपूर्वोक्तफलानिकिंसर्वदाभवंति आहोस्वित्कालविशेषइत्याह। सर्वेषांराशीनां पाकेदशायामेवंपूर्वोक्तानिफलानिभवंति। अथवासर्वेषांराशीनांपाकेचदशारंभकालेपिएवंपूर्वोक्तकेमद्रुमयोगविचारःकार्यःकेमद्रुमेसतिदशायांदारिद्र्यंस्यादिति॥ १२१॥

इति प्रथमाध्यायस्य द्वितीयः पादः॥ २॥

इतिजैमिनीयसूत्रप्रथमाध्यायस्यद्वितीय—

पादव्याख्यानम्॥ २॥

अथपदम् ॥ १ ॥

अथारूढकुंडलीग्रहानवलंब्यफलानिवक्तुंपदमधिकरोति। अथैतदनंतरंयावदीशाश्रयंपदमृक्षाणामितिसूत्रलक्षितमारूढापरपर्यायंपदमधिक्रियते॥ १॥

व्ययेसग्रहेग्रहदृष्टेश्रीमंतः ॥ २ ॥

अथैकादशस्थानफलमाह। लग्नपदादेकादशेसग्रहेग्रहांतरदृष्टेसतिलक्ष्मीवांतोभवति २

शुभैर्न्यार्य्योलाभः ॥ ३ ॥

एकादशस्थाग्रहाएकादशद्रष्टारश्चग्रहायदिशुभास्तर्हिन्यायमार्गाल्लाभःस्यात् ३॥

पापैरमार्गेण ॥ ४ ॥

पापग्रहाश्चेदेकादशस्थाद्रष्टारश्चतर्ह्यमार्गेणशास्त्रविरुद्धमार्गेणलाभोमिश्रैर्मिश्रोलाभ इतिज्ञेयम् ॥ ४ ॥

उच्चादिभिर्विशेषात् ॥ ५ ॥

उच्चस्वगृहादिस्थग्रहयोगादिनाविशेषप्राप्तिः उच्चादिगुणवद्भ्यांशुभपापाभ्यांन्यायादन्यायाच्चविशेषतोलाभइत्यर्थः । वृद्धैरप्युक्तम्—“आरूढाल्लाभभवनं ग्रहःपश्येत्तुनव्ययम् । यस्यजन्मनिसोपिस्यात्प्रबलोधनवानपि ॥ द्रष्टृग्रहाणांबाहुल्येतदाद्रष्टरितुंगगे । सार्गलेचापितत्रापिबह्वर्गलसमागमे ॥ शुभग्रहार्गलेतत्रतत्राप्युच्चग्रहार्गले । सुखानिस्वामिनादृष्टेलग्नभाग्याधिपेनवा ॥ जातस्यपुंसःप्राबल्यंनिर्दिशेदुत्तरोत्तरम्” इति । कोपिग्रहोयदिद्वादशंनपश्यतीति ॥ ५ ॥

नीचेग्रहदृग्योगाद्व्ययाधिक्यम् ॥ ६ ॥

अथपदाद्द्वादशफलमाह । द्वादशेग्रहसत्त्वेग्रहांतरदृष्टौभूयान्व्ययइत्यर्थः । शुभग्रहेसद्व्ययःपापेऽसद्व्ययइति ॥ ६ ॥

रविराहुशुक्रैर्नृपात् ॥ ७ ॥

पदाद्द्वादशेरविराहुशुक्रैर्व्यस्तैःसमस्तैर्वाराजमूलोऽव्ययः स्यात् ॥ ७ ॥

चंद्रदृष्टौनिश्चयेन ॥ ८ ॥

द्वादशगेरव्यादौचंद्रदृष्टिश्चेन्निश्चयाद्राजमूलोऽव्ययः चंद्रदृष्ट्यभावेतुसंदिग्धइति ८

बुधेनज्ञातिभ्योविवादाद्वा ॥ ९ ॥

बुधेद्वादशगेज्ञातिनिमित्ताज्झकटकाद्राद्रव्यव्ययः ॥ ९ ॥

गुरुणाकरमूलात् ॥ १० ॥

गुरुद्वादशेचत्करव्याजनव्ययः ॥ १० ॥

कुजशनिभ्यांभ्रातृमुखात् ॥ ११ ॥

द्वादशेकुजशनीचेद्भ्रात्रादिद्वाराव्ययः ॥ ११ ॥

एतैर्व्ययएवंलाभः ॥ १२ ॥

अथैकादशेलाभव्ययंवदति दिशति । एतैर्द्वादशस्थानपठितैर्ग्रहैर्यथाव्ययउक्तस्त-थातैरेवैकादशगैस्तेनैवप्रकारेणलाभोपिभवतीत्यर्थः ॥ १२ ॥

लाभेराहुकेतुभ्यामुदररोगः ॥ १३ ॥

अथपदात्सप्तमेफलमाह । पदात्सप्तमेराहुकेत्वोरन्यतरेणोदररोगः स्यात् १३ ॥

तत्रकेतुनाझटितिज्यानिलिंगानि ॥ १४ ॥

अथपदाद्वितीयस्थकेतोःफलमाह । तत्रपदाद्वितीयेकेतुयोगेनशीघ्रमेववार्द्धक्य-चिह्नानिभवंति । यत्तुस्वाम्यादिभिर्लाभपदानुवृत्त्या तत्रसप्तमेइत्युक्तं तन्न । एवंचेत्त-र्हिकेतुनाझटितिज्यानिलिंगानीतिसूत्रंप्रणीतं स्यात्तत्रेतिकिमर्थमिति । अन्यच्चचंद्रगु-रुशुक्रेषुश्रीमंतइतिवक्तव्यत्वात्सप्तमस्यधनविचाराश्रयत्वाभावादिति । तदुक्तंवृद्धैः— "आरूढात्षष्ठभेपापेचोरःस्याच्छुभवर्जिते" षष्ठभेद्वितीये । "आरूढाद्वापिसौ-म्येतुसर्वदिश्यधिपोभवेत् । सर्वज्ञस्तत्रजीवेस्यात्कविर्वादीचभार्गवे ॥" वापिद्वितीये इत्यर्थः ॥ १४ ॥

चंद्रगुरुशुक्रेषुश्रीमंतः ॥ १५ ॥

पदाद्वितीयेव्यस्ततयासमस्ततयावा चंद्रादिषुसत्सु श्रीमंतो भवंति ॥ १५ ॥

उच्चेनवा ॥ १६ ॥

द्वितीयस्थितेनशुभपापान्यतरग्रहेणोच्चस्थितेनवाश्रीमंतइत्यर्थः ॥ १६ ॥

स्वांशवदन्यत्प्रायेण ॥ १७ ॥

अन्यदत्रानुक्तंफलंकारकांशवद्बोध्यम् । प्रायेणेत्युक्त्यानसर्वत्रकारकांशवत्फलम् । औपदेशिकशास्त्रविरुद्धस्यातिदेशिकशास्त्रस्याप्रवृत्तेरिति ॥ १७ ॥

लाभपदेकेंद्रत्रिकोणेवाश्रीमंतः ॥ १८ ॥

लग्नारूढात्केंद्रत्रिकोणवालाभपदे [illegible] श्रीमंतोभवंति ॥ १८ ॥

अन्यथादुःस्थे ॥ १९ ॥

लग्नारूढात्सप्तमारूढेदुःस्थेषष्ठाष्टमव्ययस्थेसत्यन्यथास्युः श्रीमंतोनेत्यर्थः ॥१९॥

केंद्रेत्रिकोणोपचयेषुद्वयोर्मैत्री ॥ २० ॥

लग्नपदात्सप्तमपदेकेंद्रे त्रिकोणोपचयगेसतिद्वयोर्भार्याभर्त्रोर्मैत्रीभवति एवंलग्नपदात्पुत्रादिभावपदेकेंद्रेत्रिकोणोपचयगेसतितयोस्तयोर्मैत्रीज्ञेया । अत्रोपचयपदंषष्ठातिरिक्तपरंरिपुरोगचिंतासुवैरमितिवक्तव्यत्वात् ॥ २० ॥

रिपुरोगचिंतासुवैरम् ॥ २१ ॥

लग्नपदात्तत्तद्भावपदेषष्ठाष्टमव्ययगेसतितयोस्तयोर्वैरंभवति । लाभपदइत्यादिसूत्रचतुष्टयंवृद्धैःसंगृहीतम् "लग्नारूढंदारपदंमिथःकेंद्रगतंयदि । त्रिलाभेवात्रिकोणेवा-तथाराजान्वयाधमः ॥ आरूढौपुत्रपित्रोस्तुत्रिलाभकेंद्रगौयदि ॥ द्वयोर्मैत्रीत्रिकोणेतुसाम्यंद्वेषोन्यथाभवेत् ॥ एवंदारादिभावानामपिपल्यादिमित्रता ॥ जातकद्वयमालोक्यचिंतनीयंविचक्षणैः" इति ॥ २१ ॥

पत्नीलाभयोर्दिष्ट्यानिराभासार्गलया ॥ २२ ॥

पत्नीलाभयोर्लग्नपदतत्सप्तमयोर्निराभासार्गलयानिष्प्रतिबंधार्गलयादिष्ट्या भाग्यं भवति । दिष्ट्येत्याकारांतःशब्दः "दिष्ट्यासमुपजोषंचेत्यानंदे" इत्यमरः । अथवा दिष्टमेवदिष्ट्यं दिष्ट्यं भागधेयंयेषांतेदिष्ट्याःभाग्यवंतइत्यर्थः । अत्रप्राचीनैरुक्तम्-
" यस्यपापःशुभोवापिग्रहस्तिष्ठेच्छुभार्गले । तेनदृष्ट्रेक्षितंलग्नंप्राबल्यायोपकल्पते ॥ यदिपश्येद्ग्रहस्तन्नविपरीतार्गलस्थितः ॥" इति । पत्नीलाभयोरितिभाग्ययोगेसिद्धेपदरूपलग्नगतदृष्ट्यातस्यैवभाग्यप्राबल्यरूपोगुणोऽनेनविज्ञापितइतिविशेषः ॥ २२ ॥

शुभार्गलेधनसमृद्धिः ॥ २३ ॥

पदसप्तमयोःशुभैरेवयद्यर्गलंतर्हिधनंबहुवर्द्धतेएतेनपापार्गलेनधनं भवति शुभग्रहार्गलेततोविशेषइत्यर्थः । पूर्वसूत्रेशुभपापसाधारण्येनविपरीतार्गलंविनिर्मुक्तार्गलस्यधनादिसत्त्वलक्षणभाग्ययोगःफलमित्युक्तम् । अस्मिन्सूत्रेतुशुभमात्रघटितेधनवृद्धिः सार्वदिकपापमात्रघटितेधनवत्त्वमात्रम् । पापशुभोभयघटितेकदाचिद्धनसमृद्धिः कदाचिद्धनवत्त्वमिति । ननु अस्मिन्सूत्रेऽपि लोकेशुभपापसाधारणविपरीता-

र्गलभिन्नशुभार्गलमेवात्रशुभार्गलत्वेनकुतो नगृह्यतइतिचेत् । उच्यते । सूत्रद्वयेएक-रूपाचेदर्गलास्यात्तर्हिपूर्वेणैवेति सूत्रस्यवैयर्थ्यापत्तेरितिभावः । नचभाग्यवत्त्वधन-वत्त्वभेदादिति वाच्यम् । धनंविनाभाग्यवत्ताऽप्रतीतेरित्यलम् ॥ २३ ॥

जन्मकालघटिकास्वेकदृष्टासुराजानः ॥ २४ ॥

जन्मलग्नंप्रसिद्धम् । काललग्नंहोरालग्नं घटिकाघटिकालग्नम् एतेषुत्रिष्वपिक-नचिदेकेनग्रहेणदृष्टेषुराजानोभवंति । अत्रैकग्रहदृष्टिविषयत्वमपेक्षितम् । नत्वेकग्रह-मात्रदृष्टत्वम् । काललग्नानयनंप्रागुक्तम् । घटिकालग्नानयनंतुवृद्धैरुक्तम्-- "लग्ना-देकघटीमात्रंयातिलग्नंदिनेदिने । परंतुघटिकालग्नंनिर्दिशेत्कालवित्तमः ।" इति स्पष्टार्थः ॥ २४ ॥

पत्नीलाभयोश्चराश्यंशकदृक्काणैर्वा ॥ २५ ॥

जन्मराशिकुंडलीनवांशकुंडलीदृक्काणकुंडलीषुलग्नसप्तमयोर्द्वयोरपिएकग्रहदृष्टयोः सतोःराजानोभवंति । द्रेष्काणानयनंराशित्रिभागाइतिपूर्वमुक्तम् । तथाचकुंडली-त्रयभेदेनलग्नसप्तमद्वयगणनयाषट्संपद्यंतेषट्स्वपिएकग्रहदृष्टौ राजयोगःपूर्णइत्यर्थः । राशिर्जन्मकालेचन्द्राक्रांतराशिर्नतुलग्नमिति ॥ २५ ॥

तेष्वेकस्मिन्न्यूनेन्यूनम् ॥ २६ ॥

राजयोगद्वयेऽपिकिञ्चिद्वैकल्यपरमिदंसूत्रम् । ताश्चतानिचतानितेषुराश्यंशकदृक्का-णेषुजन्मकालघटिकासुच एकस्मिन्नेकग्रहदृष्टयान्यूनेसतिद्वयोर्लग्नयोरेकदृष्टयोः सतोः न्यूनराजत्वमित्यर्थः । एतदुक्तंवृद्धैः- " विलग्नघटिकालग्नहोरालग्नानिपश्यति ॥ उच्चगृहेराजयोगोलग्नद्वयमथापिवा ॥ राशेर्दृक्काणतोंशाच्चराशेरंशादथापिवा । यद्वा राशिदृकाणाभ्यांलग्नद्रष्टातुयोगदः ॥ प्रायेणायं जातकेषुप्रभूणामेवदृश्यते ॥ " वाक्यांतरञ्च- " जन्मकालघटीलग्नेष्वेकेनैवेक्षितेषुतु । उच्चारूढेतुसंप्राप्तेचंद्राक्रान्ते-विशेषतः ॥ क्रान्तेवागुरुशुक्राभ्यांकेनाप्युच्चग्रहेणवा । दुष्टार्गलग्रहाभावेराजयोगोन-संशयः ॥ " इति ॥ २६ ॥

एवमंशतोदृक्काणतश्च ॥ २७ ॥

जन्मेतिसूत्रोक्तंराजयोगमंशदृक्काणयोरतिदिशतियथाजन्मेतिसूत्रेजन्मलग्नकुंड-

स्यासहहोराघटिकाकुंडल्योः समुच्चयस्तथैवांशकुंडल्याद्दकाणकुंडल्याचपृथक्पृथक्कालघटिकाकुंडल्यौसमुचिते । तथाच लग्नकालघटिकासु अंशकालघटिकासुद्दकाणकालघटिकासुचैकदृष्टासुराजानइतिराजयोगत्रयंसिद्धयति । राजयोगांतरंग्रन्थांतराद्वृद्धैःसंगृहीतम्– " निशार्द्धाचदिनार्द्धाचपरंसार्द्धद्विनाडिका । शुभास्यात्तद्भवो राजा धनी वातत्समोपिवा ॥" इति ॥ २७ ॥

शुक्रचन्द्रयोर्मिथोदृष्टयोःसिंहस्थयोर्वायानवंतः ॥ २८ ॥

अथयानयोगमाह । शुक्रचंद्रौयत्रक्वचिद्विद्यमानौयदिपरस्परंदृष्टिभाजौतर्हियानवंतो भवंति । एवंशुक्रचंद्रावेवयदिसिंहस्थौतृतीयगौशुक्राचंद्रेतृतीयगे चंद्राच्छुक्रेवातृतीयगेसत्यपियानवंतइतिगोलार्थः । तदुक्तंवृद्धैः- " चंद्रःकविंकविश्चंद्रंपश्यत्यपि तृतीयगे । शुक्राचंद्रेततःशुक्रेतृतीयेवाहनार्थवान् " ॥ २८ ॥

शुक्रकुजकेतुषुवैतानिकाः ॥ २९ ॥

शुक्रादिषुमिथोदृष्टिमत्सुपरस्परंतृतीयस्थेष्वावितानादिराजचिह्नवंतोभवंति २९॥

स्वभाग्यदारमातृभावसमेषुशुभेषुराजानः ॥ ३० ॥

आत्मकारकाद्राश्यादिनाद्वितीयचतुर्थपंचमभावतुल्येषुशुभग्रहेषुराजानो भवंति । एवंचतत्तत्कारकवशात्तेषांतेषामपिफलमूह्यम् । तस्मात्पुत्रादिकारकेष्वपिराजयोगबलेपुत्रादीनामपिराजत्वंवाच्यम् ॥ ३० ॥

कर्मदासयोःपापयोश्च ॥ ३१ ॥

आत्मकारकात्तृतीयषष्ठभावसमयोःपापयोश्चराजानोभवंति ॥ ३१ ॥

पितृलाभाधिपाच्चैवम् ॥ ३२ ॥

कारकेनिरुक्तंयोगद्वयंलग्नसप्तमाधिपयोरतिदिशति । लग्नाधिपात्सप्तमाधिपाच्चैवंद्वितीयचतुर्थपंचमभावसमेषुशुभेषुतृतीयषष्ठभावसमयोः पापयोश्चराजानइत्यर्थः । नचारूढाधिकारात्पितृपदेनारूढोग्राह्यइतिवाच्यम् । जन्मेतिसूत्रात्सूत्रकारेणकचित्कारकात्कचिज्जन्मलग्नादुक्तत्वात्पितृशब्देनास्मिन्ग्रंथप्रायोलग्नस्यैवग्रहणाचेति ३२॥

मिश्रेसमाः ॥ ३३ ॥

यदितत्रपापःशुभस्थानेशुभःपापस्थानेतत्रफलमाह । योगद्वयेशुभपापमिश्रणेसतिसमाराजसमाइत्यर्थः ॥ ३३ ॥

दरिद्राविपरीते ॥ ३४ ॥

शुभस्थानेपापाएवपापस्थानेशुभाएवतर्हिदरिद्राभवंति ॥ ३४ ॥

मातरिगुरौशुक्रेचंद्रेवाराजकीयाः ॥ ३५ ॥

लग्नाधिपात्सप्तमाधिपाच्चपंचमेगुर्वाद्यन्यतमेसतिराजकीयाराजाधिकारवंतो भवंति ॥ ३५ ॥

कर्मणिदासेवापापेसेनान्यः ॥ ३६ ॥

लग्नसप्तमाधिपाभ्यांतृतीयेषष्ठेवापापेसतिसेनाधिपतयोभवंति ॥ ३६ ॥

स्वपितृभ्यांकर्मदासस्थदृष्ट्यातदीशदृष्ट्यामातृनाथदृष्ट्याचधीमंतः ॥ ३७ ॥

अथबुद्धियोगमाह । आत्मकारकाल्लग्नाच्चतृतीयषष्ठगतग्रहदृष्ट्याकारकेलग्नेचेत्यर्थः । तथातृतीयषष्ठेशदृष्ट्यातथापंचमेशदृष्ट्यालग्नकारकयोर्धीमंतोभवंति ॥ ३७ ॥

दारेशदृष्ट्यासुखिनः ॥ ३८ ॥

कारकाल्लग्नाद्वाचतुर्थेशदृष्ट्यालग्नकारकयोःसुखिनोभवंति॥ ३८ ॥

रोगेशदृष्ट्यादरिद्राः ॥ ३९ ॥

कारकलग्नाभ्यामष्टमेशस्यकारकलग्नयोर्दृष्ट्यादरिद्राभवंति ॥ ३९ ॥

रिपुनाथदृष्ट्याव्ययशीलाः ॥ ४० ॥

कारकलग्नाभ्यां द्वादशेशस्य लग्नकारकयोर्दृष्ट्याव्ययस्वभावाभवंति ॥ ४० ॥

स्वामिदृष्ट्याप्रबलाः ॥ ४१ ॥

लग्नेलग्ने [illegible] भवंति ॥ ४१ ॥

पश्चाद्रिपुभाग्ययोर्ग्रहसाम्यंबंधःकोणयोरिपुजाययोःकीट-युग्मयोर्दाररिष्फयोश्च ॥ ४२ ॥

अथापद्योगानाह । पश्चाल्लग्नाद्द्विद्वादशयोः पंचमनवमयोः द्वादशषष्ठयोरेकादशतृतीययोश्चतुर्थदशमयोर्वाग्रहसाम्येएकश्चेदेकः द्वौचेद्द्वौत्रयश्चेत्त्रयइतिरीत्याखेटसाम्येसतिबंधःकारापतनंभवति । अत्रपठितेषुबुद्धिकरेषुनसमुच्चयनियमइतिवाच्यम् । एवमृक्षाणांतदीशानांचशुभसंबंधेनिरोधमात्रंपापसंबंधाच्छृंखलाप्रहारादयः । ऋक्षाणांद्विद्वादशादिद्विकानांपूर्वोक्तरीत्याशुभसंबंधेसतिद्वितीयद्वादशयोरित्यादि द्विकयोरन्यतरयोगघटकतयाशुभसंबंधश्चेन्निरोधमात्रं नतुपीडा । पापसंबंधात्केवलपापसंबंधाच्छृंखलादयोभवंति । द्विद्वादशादिषुशुभसंबंधाभावेपिद्वादशेशादिषुशुभसंबंधे सतिनिरोधमात्रंपापसंबंधेतुशृंखलादयोभवंतीत्यर्थः ॥ ४२ ॥

शुक्राद्गौणपदस्थोराहुःसूर्यदृष्टोनेत्रहा ॥ ४३ ॥

अथनेत्रभंगयोगमाह । शुक्राल्लग्नाद्गौणपदस्थः पंचमराश्यारूढस्थोराहुः सूर्यदृष्टश्चेन्नेत्रनाशकरःस्यात् ॥ ४३ ॥

स्वदारगयोःशुक्रचंद्रयोरातोद्यंराजचिह्नानिच ॥ ४४ ॥

स्वस्मादात्मकारकाच्चतुर्थगयोःशुक्रचंद्रयोः सतोः आतोद्यंवाद्यविशेषोराजचिह्नानिपताकादीनिचस्युः ॥ ४४ ॥

इति प्रथमाध्यायस्य तृतीयः पादः ॥ ३ ॥

इति जैमिनीयसूत्रव्याख्यायांसुबोधिन्यांप्रथमाध्यायस्यतृतीयःपादः ॥ ३ ॥

उपपदंपदंपित्रनुचरात् ॥ १ ॥

अथोपपदादिकमवलंब्यफलमादिशति तत्रादावुपपदंलक्षयति । लग्नानुचरात्पदंलग्नाद्द्वादशस्यराशेर्यत्पदंतदुपपदमित्यर्थः । ननुपित्रनुचरपदेनद्वादशस्यबोधः कथमितिचेत् । उच्यते । पितृलग्नमनुचरंद्वितीयं यस्येतिव्युत्पत्त्यागृहाण । यत्तु पित्र्यनुचरादितिपाठंस्वीकृत्याखंडात्सप्तसंख्यालाभात्सप्तमात्पदमुपपदमितिपंथैरुक्तं तदयुक्तम् । एवंचलघिवात् उपपदपदलाभादितिसूत्रप्रणीतं स्यादित्यलम् ॥ १ ॥

तत्रपापस्यपापयोगेप्रव्रज्यादारनाशोवा ॥ २ ॥

तत्रफलमाह । पापस्यतत्रपापस्वामिके तस्मिन्नुपपदद्वितीयेपापयोगेसति प्रव्रज्यासंन्यासः स्त्रीनाशोवास्यात् । यथाकारकाधिकारपदाधिकारयोस्तत्रेतिपदेन कारकेपदेइत्यर्थोभवति तथात्रोपपदेइतिकुतोनोक्तमितिचेत्सत्यं तत्रोभयत्राधिकारः स्थितः अत्रनास्तीति तत्रपदेनद्विसंख्यालाभादुपपदद्वितीये इत्युक्तम् अनुभवसिद्धत्वाचेति । तदुक्तं वृद्धैः "आरूढात्षष्ठमे पापेचोरःस्याच्छुभवार्जिते । आरूढाद्वापिसौम्येतुसर्वदिश्यधिपोभवेत् ॥ सर्वज्ञस्तत्रजीवेस्यात्कविर्वादेचभार्गवे ।" इति ॥ आरूढादुपपदाद् आरूढपदेनचेदारूढंगृह्यते तर्हिपदाधिकारएवोक्तंस्यान्नत्वत्रेति । नचोपपदादितिवक्तव्येआरूढादितिकथमुक्तमितिवाच्यम् ॥ २ ॥

उपपदस्याप्यारूढत्वादेवनात्ररविःपापः ॥ ३ ॥

अत्रविषयेरविःपापत्वेननग्राह्यः । तेनसिंहेउपपदद्वितीयेमेषादिपापराशौ रवौवा सतिनेदंफलमित्यर्थः ॥ ३ ॥

शुभदृग्योगान्न ॥ ४ ॥

उपपदद्वितीयेशुभदृष्टियोगाभ्यामुक्तयोगेसत्यपिनेदंफलंभवति ॥ ४ ॥

नीचेदारनाशः ॥ ५ ॥

उपपदद्वितीयेनीचग्रहांशकेनीचग्रहाधिष्ठितेवासतिदारनाशोभवति ॥ ५ ॥

उच्चेबहुदारः ॥ ६ ॥

उपपदद्वितीयेउच्चेश उच्चग्रहाधिष्ठितेवासतिबहुदारःस्यात् ॥ ६ ॥

युग्मेच ॥ ७ ॥

उपपदद्वितीयेमिथुनेसतिबहुदारःस्यात् ॥ ७ ॥

तत्रस्वामियुक्तेस्वर्क्षेवातद्धेतावुत्तरायुषिनिर्दारः ॥ ८ ॥

दारनाशयोगेविलंबकरयोगमाह । तत्रोपपदद्वितीयेस्वामिनायुक्तेउत्तरायुषिनिर्दारःस्यात् । तच्छब्देनपूर्वपरामर्शः तद्धेतौ तस्योपपदद्वितीयस्यहेतुःस्वामीतस्मिन्स्वर्क्षेस्वराशौसतिचोत्तरायुषिनिर्दारःस्यात् । राशेःकारणीभूतोग्रहएवतस्यकारण-

मिनः स्वगृहयोगोऽपेक्षितः । ननुस्वाम्यादिभिस्तच्छब्देनदारकारकग्रहणात्त्वयेदंकथमुक्तमितिचेच्छृणु । आदौदारकारकग्रहणाभावात्तच्छब्देनदारकारकग्रहणानौचित्यात् । पूर्वदारनाशपदेनदारकारकबोधाभावाच्च । ननुरविचंद्रयोरेकगृहत्वात्स्वर्क्षे तद्धेतावित्यंशस्यसंभवोनेतिचेन्मास्त्वस्माकंकाक्षतिरिति ॥ ८ ॥

उच्चेतस्मिन्नुत्तमकुलाद्दारलाभः ॥ ९ ॥

तस्मिन्नुपपदद्वितीयस्वामिनि उच्चराशौस्थितेसत्युत्तमकुलाद्दारलाभःस्यात् ॥९॥

नीचेविपर्ययः ॥ १० ॥

तस्मिन्नुपपदद्वितीयस्वामिनिनीचराशिस्थितेसतिअनुत्तमकुलाद्दारलाभः स्यात् १०॥

शुभसंबंधात्सुंदरी ॥ ११ ॥

उपपदद्वितीयशुभवर्गदृष्टियोगेसतिस्त्रीसुंदरीभवति ॥ ११ ॥

राहुशनिभ्यामपवादात्त्यागोनाशोवा ॥ १२ ॥

उपपदद्वितीयेराहुशनिभ्यांयोगेसतिलोकापवादात्स्त्रियास्त्यागोनाशोवा स्यात् ॥ १२ ॥

शुक्रकेतुभ्यांरक्तप्रदरः ॥ १३ ॥

उपपदद्वितीयेशुक्रकेतुयोगेसतिरक्तप्रदररोगवतीस्त्रीस्यात् ॥ १३ ॥

अस्थिस्रावोबुधकेतुभ्याम् ॥ १४ ॥

उपपदद्वितीयेबुधकेतुभ्यांयोगेअस्थिस्रावरोगवतीस्त्रीस्यात् ॥ १४ ॥

शनिराविराहुभिरस्थिज्वरः ॥ १५ ॥

उपपदद्वितीयेशन्यादित्रिकयोगेऽस्थिज्वरवतीस्यात् ॥ १५ ॥

बुधकेतुभ्यांस्थौल्यम् ॥ १६ ॥

उपपदद्वितीयेबुधकेतुभ्यांयोगेस्थूलास्त्रीस्यात् ॥ १६ ॥

बुधक्षेत्रेमंदाराभ्यांनासिकारोगः ॥ १७ ॥

बुधगृहेभौमगृहेवोपपदद्वितीयगतेसतिशनिभौमाभ्यांयोगेनासिकारोगवती स्यात् ॥ १७ ॥

कुजक्षेत्रेच ॥ १८ ॥ गुरुशनिभ्यां कर्णरोगो नरहका च ॥ १९ ॥

बुधकुजान्यतरक्षेत्रे उपपदद्वितीयगेसतितत्रगुरुशनियोगे कर्णरोगवतीनरहका नाडिकानिःसरणरोगवतीचस्यात् ॥ १८ ॥ १९ ॥

गुरुराहुभ्यांदंतरोगः ॥ २० ॥

बुधकुजान्यतरक्षेत्रगेउपपदद्वितीयेगुरुराहुभ्यांयोगेदंतरोगवतीस्यात् ॥ २० ॥

शनिराहुभ्यांकन्यातुलयोःपंगुर्वातरोगोवा ॥ २१ ॥

कन्यातुलान्यतरगेउपपदद्वितीयेशनिराहुभ्यांयोगेपंगुर्वातरोगवतीवास्यात् २१॥

शुभदृग्योगान्न ॥ २२ ॥

यद्युपपदेद्वितीयेशुभयोगोदृष्टिर्वास्यात्तर्हिनिरुक्तादोषानस्युः ॥ २२ ॥

सप्तमांशग्रहेभ्यश्चैवम् ॥ २३ ॥

उपपदाद्यःसप्तमोभावस्तद्भावस्थनवांशश्चताभ्यांतयोःस्वामिनौग्रहौताभ्यांचद्वितीये एवंपूर्वोक्तानिफलानिसमुन्नेयानि । तदुक्तंवृद्धैः— " सप्तमेशाद्वितीयस्थेप्येवं फलमुदाहृतम् " इति ॥ २३ ॥

बुधशनिशुक्रेचानपत्यः ॥ २४ ॥

उपपदात्सप्तमांशग्रहेषुबुधशनिशुक्रयोगेसत्यपत्यहीनोभवति ॥ २४ ॥

पुत्रेषुरविराहुगुरुभिर्बहुपुत्रः ॥ २५ ॥

उपपदात्सप्तमांशग्रहेभ्यः पंचमस्थानेषु रव्यादिषु सत्सु बहुपुत्रःस्यात् ॥ २५ ॥

चंद्रेणैकपुत्रः ॥ २६ ॥

सप्तमांशग्रहेभ्यःपंचस्थानेषुचंद्रेसतिएकपुत्रःस्यात् ॥ २६ ॥

मिश्रेविलंबात्पुत्रः ॥ २७ ॥

उपपदात्सप्तमांशग्रहेभ्यःपंचमस्थानेषुअनपत्यत्वबहुपुत्रत्वादिग्रहमिश्रणे सतिविलंबात्पुत्रलाभःस्यात् ॥ २७ ॥

कुजशनिभ्यांदत्तपुत्रः ॥ २८ ॥

उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुकुजशनिभ्यांस्थिताभ्यांदत्तपुत्रवान्स्यात् ॥२८॥

ओजेबहुपुत्रः ॥ २९ ॥

उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुओजराशौसतिबहुपुत्रःस्यात ॥ २९ ॥

युग्मेऽल्पप्रजः ॥ ३० ॥

उक्तस्थानेयुग्मराशौसत्यल्पापत्योभवति ॥ ३० ॥

गृहक्रमात्कुक्षितदीशपंचमांशग्रहेभ्यश्चैवम् ॥ ३१ ॥

गृहक्रमाज्जन्मलग्नक्रमात् यथाभावानांविचारःक्रियते तथाकुक्षितदीशादिभ्योऽपिकुर्यात् । कुक्षितदीशावुपपदोपपदेशौताभ्यांपंचमांशग्रहाःपंचमभावस्तद्भावस्थनवांशश्चताभ्यांतयोः स्वामिग्रहाभ्यांचैवपूर्वोक्तफलविचारः कार्य इत्यर्थः । तस्माद्यत्रयस्यसंभवस्तस्याग्रिमसूत्रेनुवृत्तिः कार्या । भ्रातृभ्यामित्यादिसूत्रेषूपपदोपपदेशाभ्यां विचारःकार्यइति । कुक्षिपदेनप्रकरणपठितोपपदस्य ग्रहणम् । ननुस्वाम्यादिभिः कुक्षितदीशाविति सिंहरवीत्युक्तंतत्सर्वसाधारण्यादनुपयुक्तंविशेषतोऽस्मिञ्छास्त्रेऽक्षरगम्यांकानामेवग्रहणादिति ॥ ३१ ॥

भ्रातृभ्यांशनिराहुभ्यांभ्रातृनाशः ॥ ३२ ॥

उपपदोपपदेशाभ्यांभ्रातृस्थाभ्यामेकादशतृतीयस्थाभ्यांशनिराहुभ्यांभ्रातृनाशः एकादशेज्येष्ठस्यतृतीयेकनिष्ठस्यनाशः कर्मादिभिर्भ्रातुर्व्ययादिर्ज्येष्ठस्येतिसूत्रदर्शनात् । ननुउपपदोपपदेशाभ्यामितिकुतःसमागतमितिचेच्छृणु । गृहक्रमादितिसूत्रात्कुक्षितदीशपदात् । नचसमासपतितपदानामेकांशानुवृत्तिरसंभवादितिवाच्यम् । अन्यपदेभ्योभ्रातृविचारायोग्यत्वादेकांशानुवृत्तेरितिभावः ॥ ३२ ॥

शुक्रेणव्यवहितेगर्भनाशः ॥ ३३ ॥

एकादशतृतीयान्यतरस्थेनशुक्रेणयथाक्रमंव्यवहितपूर्वापरमातृगर्भनाशःस्यात् ३३

पितृभावशुक्रदृष्टेपि ॥ ३४ ॥

लग्नलग्नादष्टमेवाशुक्रदृष्टेसत्यपिव्यवहितगर्भनाशइत्यर्थः ॥ ३४ ॥

कुजगुरुचंद्रबुधैर्बहुभ्रातरः ॥ ३५ ॥

उपपदोपपदेशाभ्यांतृतीयैकादशस्थैःकुजादिभिर्भ्रातृबाहुल्यंस्यात् ॥ ३५ ॥

शन्याराभ्यांदृष्टेयथास्वंभ्रातृनाशः ॥ ३६ ॥

उपपदोपपदेशाभ्यांतृतीयैकादशयोःशन्यारदृष्टौसत्यांयथास्वंभ्रातृस्थानमनतिक्र-
म्यतृतीयेदृष्टौकनिष्ठस्यैकादशेदृष्टौज्येष्ठस्योभयत्रदृष्टावुभयोश्चनाशःस्यात् ॥ ३६ ॥

शनिनास्वमात्रशेषश्च ॥ ३७ ॥

उपपदोपपदेशाभ्यांतृतीयैकादशयोःशनिदृष्टौसत्यांकेवलंस्वमात्रशेषःस्यादन्ये न-
श्यंतीत्यर्थः ॥ ३७ ॥

केतौभगिनीबाहुल्यम् ॥ ३८ ॥

उपपदोपपदेशाभ्यांतृतीयैकादशयोःकेतौसतिभगिन्योर्यथास्वंभूयस्योभवंति ३८

लाभेशाद्भाग्यभेराहौदंष्ट्रावान् ॥ ३९ ॥

उपपदसप्तमेशाद्द्वितीयराशौराहौसतिस्थूलदंष्ट्रावान्स्यात् । तदुक्तंप्राच्यैः—
“सप्तमेशाद्द्वितीयस्थेराहौमूकःखलेस्थिते । अदंतोऽधिकदंतोवादंष्ट्रायुक्तोथवाभवेत् ॥
पवनव्याधिमान्केतौयद्वास्यादस्फुटोक्तिमान् । तत्रनानाग्रहैर्योगोमिश्रंफलमुदाहृ-
तम् ॥” इति ॥ ३९ ॥

केतौस्तब्धवाक् ॥ ४० ॥

उपपदसप्तमेशाद्द्वितीयेकेतौसतिस्तब्धवागस्फुटोक्तिमान्स्यात् ॥ ४० ॥

मंदेकुरूपः ॥ ४१ ॥

उपपदसप्तमेशाद्द्वितीयेशनौसतिकुरूपोभवति ॥ ४१ ॥

स्वांशवशाद्गौरनीलपीतादिवर्णाः ॥ ४२ ॥

आत्मकारकाश्रितनवांशस्वभावाज्जातकांतरप्रसिद्धाजातकवतोवर्णाग्राह्याः, एवं
च तत्तत्कारकांशतस्तेषांतेषांवर्णाज्ञेयाइत्यपिबोध्यम् ॥ ४२ ॥

अमात्यानुचराद्देवताभक्तिः ॥ ४३ ॥

अमात्यग्रहान्न्यूनोयोग्रहस्तस्माद्देवताभक्तिर्विचारणीया । अमात्यानुचरो देव-
त्वकारकस्तस्यपापत्वेक्रूरदेवतायां शुभत्वेसौम्यदेवतायाम् उच्चगत्वेस्वर्क्षगतत्वेचभ-
क्तिदृढतानीचगत्वेभक्त्यस्थैर्यमित्यादिकंज्ञेयम् ॥ ४३ ॥

स्वांशेकेवलंपापसंबंधेपरजातः ॥ ४४ ॥

कारकांशेशुभग्रहरहितेकेवलंपापसंबंधेजारजातोभवति संबंधस्तुदृष्टियोगषड्वर्गै- र्ज्ञेयः ॥ ४४ ॥

नात्रपापात् ॥ ४५ ॥

अत्रकारकश्चेत्पापोभवतितदात्विदंफलंनस्यात् कारकातिरिक्तादेवपापसंबंधादिफ- लंवाच्यं न कारकात्पापादित्यर्थः । अथवाऽत्राष्टमेपापग्रहेसतिनायं योगः॥४५॥

शनिराहुभ्यांप्रसिद्धिः ॥ ४६ ॥

शनिराहूयदियोगघटकौ शनिराहुदृष्टियोगषड्वर्गैः परजातत्वप्रसिद्धिर्भवति॥४६॥

गोपनमन्येभ्यः ॥ ४७ ॥

अन्येभ्यःपापग्रहेभ्योयोगेसतिपरजातत्वगोपनंभवति ॥ ४७ ॥

शुभवर्गेऽपवादमात्रम् ॥ ४८ ॥

पापग्रहेषुयोगघटकेषुसत्सुकारकांशेशुभषड्वर्गसंबंधेसतितुपरजातत्वापवादएवम- चेन्नतुपरजातत्वमित्यर्थः ॥ ४८ ॥

द्विग्रहेकुलमुख्यः ॥ ४९ ॥

कारकांशेद्विग्रहयोगेसतिकुलमुख्योभवति ॥ ४९ ॥

इतिप्रथमाध्यायस्यचतुर्थःपादः ॥ ४ ॥

इतिश्रीनीलकंठज्योतिर्विद्विरचितायांजैमिनीयसूत्रव्याख्यायांसुबोधिन्यां प्रथमा- ध्यायस्यचतुर्थःपादःसमाप्तः ॥ ४ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

आयुःपितृदिनेशाभ्याम् ॥ १ ॥

अथायुर्दायोपायंदर्शयति । लग्नेशाष्टमेशाभ्यामायुर्विचार्यमित्यर्थः ॥ १ ॥

प्रथमयोरुत्तरयोर्वादीर्घम् ॥ २ ॥

लग्नेशाष्टमेशस्थितिवशतोदीर्घायुर्योगमाह । प्रथमयोश्चरयोरुत्तरयोः स्थिरद्विस्व- भावयोर्वा [illegible] लग्नेशाष्टमेशौभवतस्तदादीर्घमायुर्भवति । अयमर्थः । यत्रकापिचर-

राश्योर्लग्नेशाष्टमेशयोःस्थित्यादीर्घायुर्योगः स्थिरद्विस्वभावयोः लग्नेशाष्टमेशयोः स्थित्यावा स्थिरेलग्नेशेसतिद्वंद्वेऽष्टमेशःद्वंद्वेलग्नेशेसतिस्थिरेऽष्टमेशइति पर्यायेणभवत- स्तदापिदीर्घायुर्योगःस्यादिति । अत्रैकस्मिन्नेवचरादौतदुभयसत्त्वेएकस्यैवतदुभय- स्वामित्वेवानयोगहानिः ॥ २ ॥

प्रथमद्वितीययोरंत्ययोर्वामध्यम् ॥ ३ ॥

अथमध्यायुर्योगंदर्शयति । प्रथमद्वितीययोश्चरस्थिरयोश्चरेलग्नेशःस्थिरेऽष्टमेश- श्चरेऽष्टमेशः स्थिरेलग्नेशइतिरीत्यायदिभवतः, यदिवाद्विस्वभावयोर्द्वावपिलग्नेशाष्टमेशौ यत्रक्वापिभवतस्तर्हिमध्यायुर्भवतीत्यर्थः ॥ ३ ॥

मध्ययोराद्यंतयोर्वाहीनम् ॥ ४ ॥

अथाल्पायुर्योगमाह । यदिमध्ययोःस्थिरयोर्यत्रक्वापिलग्नेशाष्टमेशौस्तः यदिवाभाद्यं- तयोश्चरद्विस्वभावयोर्लग्नेशाष्टमेशौस्तस्तर्हिहीनमल्पायुर्भवतीत्यर्थः । अथयथालग्नेशा- ष्टमेशयोराशिस्थितिभेदेनदीर्घमध्याल्पायूंषिप्रोक्तानितथैवलग्नचंद्राभ्यामप्युच्यंते ॥४॥

एवंमंदचंद्राभ्याम् ॥ ५ ॥

मंदचंद्राभ्यांलग्नेन्दुभ्यामेवंपूर्वोक्तप्रकारेणदीर्घमध्याल्पायूंषिविचार्याणीत्यर्थः॥ ५ ॥

पितृकालतश्च ॥ ६ ॥

१ दीर्घ १	१ मध्य २	१ अल्प ३
२ दीर्घ ३	२ मध्य १	२ अल्प २
३ दीर्घ २	३ मध्य ३	३ अल्प १

जन्मलग्नहोरालग्नाभ्यांचपूर्वोक्तप्रकारेणदीर्घमध्या ल्पायूंषिसमानेयानि । तथाच त्रिविधद्वंद्वेनदीर्घम ध्याल्पायूंषित्रेधासमानेयानीतिपर्यवसितोर्थः । हो- रालग्नानयनंतुपूर्वमेवोक्तम् । एतदुक्तंवृद्धैः– "लग्ने शरंध्रपत्योश्चलग्नद्वोर्लग्नहोरयोः । सूत्राण्येवंप्रयुंजीयात्संवादादायुषांत्रये ॥ चरेचर- स्थिरद्वंद्वाःस्थिरेद्वंद्वचरस्थिराः । द्वंद्वस्थिरोभयचरादीर्घमध्याल्पकायुषः" प्रथमयो- रित्यादिसूत्रत्रयसंग्रहकश्चइति प्रस्तारश्लोकः । प्रस्तारश्चकेदृश्यः ॥ ६ ॥

संवादात्प्रामाण्यम् ॥ ७ ॥

अथत्रिविधेष्वायुर्दायनिर्णयोपायेषुत्रयाणामेकाकारायुःप्रदत्वेनिर्विवादमेव—द्वयोरेकाकारायुःप्रदत्वेऽपरस्यभिन्नायुःप्रदत्वेनिर्णयमाह प्रकारद्वयेन यादृशमायुरायाति तदेवग्राह्यंनत्वेकेनागतमिति ॥ ७ ॥

विसंवादेपितृकालतः ॥ ८ ॥

अथत्रयाणांपक्षाणांवैरूप्येग्राह्यपक्षमाह । त्रयाणामपिपक्षाणांविसंवादेवैरूप्येसति जन्मलग्नहोरालग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः ॥ ८ ॥

पितृलाभगेचंद्रेचंद्रमंदाभ्याम् ॥ ९ ॥

सर्वत्रैवविसंवादेलग्नहोराभ्यामेवायुःप्राप्तावपवादमाह । लग्नेसप्तमेवाचंद्रे स्थिते सतिचंद्रलग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः । अल्पायुष्यादिकंवृद्धैरुक्तम् "द्वात्रिंशात्पूर्वमल्पायुर्मध्यमायुस्ततोभवेत् । चतुःषष्टयाःपुरस्तात्तुततोदीर्घमुदाहृतम् ॥" इति । द्वात्रिंशच्चतुष्षष्टिषण्णवतिरूपेष्वागतेष्वायुर्दायेषुस्पष्टीकरणंवृद्धैरुक्तम्— "पूर्णमादौ हानिरंतेऽनुपातोमध्यतोभवेत् । राशिद्वयस्ययोगार्द्धंवर्षाणांस्पष्टमुच्यते ॥ एवंद्विकानांसंचिंत्यत्रयाणांसूत्रवर्त्मना"इति । अयमर्थः । प्रथमयोरित्यादिसूत्रजालेनायुर्यन्निर्णीतं तत्रदीर्घायुषिसमागतेमध्यमायुरवधिपर्यंतंनिर्विशंकंसिद्धमेव तदुपरितने दीर्घायुःखंडेद्वात्रिंशदब्दरूपे कियद्ग्राह्यमिति संशयनिराकरणायायंश्लोकः । पितृदिनेशौद्वावपियद्राशौभवतस्तद्राशेरारंभेतौचेत्तर्हितत्रोचितःखंडःपूर्णएवतद्राश्यंतेयदि तौभवतस्तर्हितत्खंडस्यविनाशएव मध्येत्वनुपातेनखंडैकदेशोग्राह्यः । अनुपातस्त्वित्थं त्रिंशदंशैश्चेद्द्वात्रिंशद्वर्षाणितर्ह्यनेनांशेनकिमिति $\frac{३२\times इं.अं.}{३०}$ प्राप्तमायुः । तत्रलग्नेशाष्टमेशयोः पृथक्स्पष्टम्, एवंविधराशीन्दूरीकृत्यांशादेरेकखंडस्यत्रैराशिकेनयदायाति लग्नेशस्याष्टमेशस्यच तयोरागतयोर्वर्षादिपिंडयोर्योगंविधायतद्योगार्द्धंस्पष्टंभवति तच्चयदिदीर्घायुःसंबंधितर्हिचतुःषष्टिमध्येयोज्यम् । यदिमध्यायुःसंबंधितदाद्वात्रिंशन्मध्येयोज्यम् । यद्यल्पायुःसंबंधितदाप्रथमखंडाभावात्स्वयमेवजन्मप्रभृतिवर्तमानमायुर्भवति एवं मंदचंद्रयोःपितृकालयोरपिसमागतायुष्यंतिमखंडस्पष्टीकरणंविज्ञेयम् । अन्येतु—"होरालग्नादिमांशेतुपूर्णमंतेनकिंचन । स्पष्टीकरणमेतत्स्याद्दीर्घमध्याल्पकायुषि॥" अनुपातस्तुपूर्ववत् अनेनहोरालग्नस्य [illegible] वयत्वप्रदर्शितम् ॥ ९ ॥

शनौयोगहेतौकक्ष्याह्रासः ॥ १० ॥

अथदीर्घमध्याल्पायुर्योगेषुकंचनाविशेषंदर्शयति । यद्यत्रशनिर्योगकर्तास्यात्तदा कक्ष्याह्रासोभवति, दीर्घंचेन्मध्यंमध्यंचेदल्पमल्पंचेन्न किंचन इति ॥ १० ॥

विपरीतमित्यन्ये ॥ ११ ॥

मतांतरमाह—शनौयोगकर्तरिविपरीतंह्रासोभवति किंतु यथास्थितएवेत्यन्येआ-चार्यावदंति ॥ ११ ॥

सूत्राभ्यांनस्वर्क्षतुंगगेसौरे ॥ १२ ॥

केवलपापदृग्योगिनिच ॥ १३ ॥

परपक्षंनिर्दिश्यस्वपक्षमाह । स्वराशिस्वोच्चगेशनौतथाशुभदृग्योगरहितकेवलपा-पदृष्टियोगविशिष्टशनौचनकक्ष्याह्रासः अन्यथातुह्रासोभवत्येव ॥ १२ ॥ १३ ॥

पितृलाभगेगुरौकेवलशुभदृग्योगिनिचकक्ष्यावृद्धिः ॥१४॥

अत्रान्याचार्यमतमेवानुभवसिद्धमिति । सर्वमतसिद्धांतकक्ष्यावृद्धियोगांतरेणोपदि-शति ॥ लग्नसप्तमयोर्गुरौसतितथापापदृष्टिपापयोगरहितशुभदृष्टिशुभयोगसहितेगुरौ चकक्ष्यावृद्धिरित्यर्थः । तथाचानायुषोल्पायुर्वृद्धिः अल्पायुषोमध्यायुर्वृद्धिः मध्या-युषोदीर्घायुर्वृद्धिः दीर्घायुषःषण्णवत्यूर्ध्वमायुर्भवतीत्यर्थः ॥ १४ ॥

मलिनेद्वारबाह्येनवांशेनिधनंद्वारद्वारेशयोश्चमालिन्ये १५॥

आयुषिप्रमाणसिद्धेपूर्णमरणमंतरापिमरणंभवतीत्याकांक्षायामाह ॥ द्वारंबाह्यं चेतिसमाहारद्वंद्वःदशाश्रयोद्वारंततस्तावतिथंबाह्यमित्यग्रेवक्ष्यति तस्मिन्पाकभोगा-परपर्यायेद्वारबाह्येमलिने स्वयंपापेपापयुक्तेपापदृष्टेचसतिद्वारबाह्ययोर्नवांशेनवांशद-शायांनिधनंभवति । अत्रनवांशपदेनप्रतिराशिनवांशमितानवाब्दाग्राह्याः विषमेतदा-दिर्नवांशइत्यादिनावक्ष्यमाणानवांशदशेतिजन्मकालेआद्यदशाश्रयराशेर्यावत्संख्या-कोधरराशिस्तस्मात्तावत्संख्याकोराशिर्बाह्यमुच्यते द्वारबाह्ययोर्द्वयोरपिमलिनत्वएव-निधनंनत्वन्यतरस्य । एवंद्वारराशेर्द्वारेशस्यच मालिन्येसतिद्वारतदीशाश्रयराशिनवां-शदशायांनिधनंभवतीत्यर्थः ॥ १६ ॥

शुभदृग्योगान्न ॥ १६ ॥

निधनयोगापवादमाह । द्वारबाह्यद्वारेशानांशुभदृष्टिशुभयोगसत्त्वेद्वारबाह्यद्वारेशाश्रयनवांशदशायांनिधनंनेत्यर्थः ॥ १६ ॥

रोगेशेतुंगेनवांशवृद्धिः ॥ १७ ॥

अथशुभदृग्योगाभावेपिनवांशकालनिधनापवादमाह । जन्मलग्नादष्टमेशेउच्चंगतेसत्युक्तनिधनयोगेसत्यपिदशायांमरणमुक्तम् । तदुत्तरंनवांशवृद्धिः नवाब्दवृद्धिरित्यर्थः ॥ १७ ॥

तत्रापिपदेशदशांतेपदनवांशदशायांपितृदिनेशत्रिकोणेवा ॥ १८ ॥

ननुराशिवृद्धौसत्यांकुत्रराशौनिधनमितिशंकायामाह । तत्रापिवृद्धिपक्षेपिपदम्लग्नारूढस्येशः स्वामी तदाश्रयीभूतराशेर्दशायामंतेनिधनंस्यात् अथवा जन्मलग्नारूढनवांशदशायांनिधनंस्यात्किंवालग्नेशाष्टमेशाभ्यांत्रिकोणेलग्नपंचमनवमान्यतमराशिदशायामंतर्दशायांवानिधनंभवतीत्यर्थः ॥ १८ ॥

पितृलाभरोगेशेप्राणिनिकंटकादिस्थेस्वतश्चैवंत्रिधा ॥ १९ ॥

अथप्रकारांतरेणदीर्घादियोगत्रयमाह । लग्नात्सप्तमाच्चयावष्टमेशौतयोर्यः प्राणी बलीतस्मिन्कंटकादिस्थेलग्नादिकेंद्रपणफरापोक्लिमस्थेत्रिधायोगोभवति लग्नादिकेन्द्रगेतस्मिन्दीर्घायुर्योगः पणफरस्थे मध्यायुः आपोक्लिमस्थेत्वल्पायुरित्यर्थः । एवंस्वतश्च कारकादपियोगत्रयमिदंबोध्यम् । तथाचकारकात्तत्सप्तमाच्चयावष्टमेशौ तयोर्यो बलीतस्मिन्कारककेंद्रादिस्थेदीर्घमध्याल्पायुर्योगाभवंतीत्यर्थः ॥ १९ ॥

योगात्समेस्वस्मिन्विपरीतम् ॥ २० ॥

अथैतद्योगानामपवादमाह । योगाज्जन्मलग्नसप्तमात्सप्तमेनवमेस्वस्मिन्कारके सति विपरीतंपितृलाभेत्यादिसूत्रोपदिष्टयोगानस्युः किन्तुदीर्घंचेन्मध्यंमध्यंचेदल्पमल्पंचेन्नकिंचिदित्यर्थः । वैपरीत्यंतुदीर्घंचेदल्पमल्पंचेद्दीर्घमध्यंचेन्मध्यमेवेतितुसंप्रदायविदः । आयुर्दायविषयेविशेषमाहुर्वृद्धाः "पक्वोपमेश [illegible] त्योचस्थः पर्यायार्द्धंप्रयच्छ-

ति। नीचस्थोनाशयेत्पर्यायार्द्धमायुषिनिश्चिते। नीचरंध्रेशसंयुक्ताःपर्यायार्द्धपृथक्पृथक्। ग्रहाविनाशयंत्येवंनिर्णीतेपरमायुषि॥ उच्चरंध्रेशसंयुक्तग्रहैः प्रत्येकमुन्नयेत्। एकैकमर्द्धपर्यायंपरमायुषिनिश्चिते॥'' अयमर्थः। आयुः पितृदिनेशाभ्यामित्यनेनाष्टमेशउच्चस्थश्चेत्स्वपर्यायार्द्धस्वदशार्द्धमधिकंददाति, नायांताइतिरीत्यायावदायुरायातितस्मिन्पुनरपितदर्धमधिकंयोजनीयमितियावत्। अष्टमेशोनीचराशिगश्चेदायुष्यर्द्धनाशयेत् एवमेवनीचाष्टमेशयुक्ताग्रहाअपिस्वदीयमानायुष्यर्द्धमर्द्धनाशयेयुः एवमुच्चाष्टमेशसंयुक्ताग्रहाः स्वदीयमानायुषिस्वदशार्द्धमधिकंदद्युः। एवमेवलग्नेशादयोपिग्रहाः उच्चनीचगुणतोवृद्धिह्रासौकुर्युरितिसंप्रदायः॥ २०॥

राशितःप्राप्यः॥ २१॥

अस्मिन्प्रकरणेकिंबलंग्राह्यमित्याशंकायामाह। अत्रराशितोबलंग्राह्यं कारकयोगः प्रथमोभानामित्यादिकंवक्ष्यमाणबलंग्राह्यम् अत्रांशाधिक्यबलंनग्राह्यमित्यर्थः॥२१॥

रोगेशयोःस्वतऐक्येयोगेवामध्यम्॥ २२॥

अथप्रकारांतरेणमध्यायुर्योगमाह। लग्नात्सप्तमाच्चरोगेशयोरष्टमेशयोः स्वतः कारकेणैक्येसतियोगे वा सतिपितृलाभेत्यादिसूत्रेणप्राप्तदीर्घायुषामपिमध्यायुरेवभवतीत्यर्थः। जातकशास्त्रांतरे लग्नस्यास्मिन्ग्रंथेकारकस्यप्राधान्यादष्टमेशयोगेनायुषोह्रासएवेतिविभावनीयम्॥ २२॥

पितृलाभयोःपापमध्यत्वेकोणपापयोगेवाकक्ष्याह्रासः २३

अथदीर्घादियोगेषुकक्ष्याह्रासमाह। पितृलाभयोर्लग्नसप्तमयोर्द्वयोरपिपापग्रहस्य मध्यवर्तित्वेकक्ष्याह्रासोभवति लग्नकुंडल्याद्विद्वादशयोः षष्ठाष्टमयोश्चपापयोगेसति पापमध्यवर्तित्वंभवति। एवंलग्नसप्तमयोःकोणपापयोगेवाकोणेषुत्रिकोणेषु लग्नपंचमनवमेषु सर्वत्रपापयोगेवा कक्ष्याह्रासोभवति॥ २३॥

स्वस्मिन्नप्येवम्॥ २४॥

स्वस्मिन्कारकेप्येवंलग्नकुंडलीवद्भवति। अयमर्थः। कारकराशेस्तत्सप्तमराशेश्चपापमध्यत्वेएकोयोगः कारकतत्सप्तमयोस्त्रिकोणेसर्वत्रपापयोगेसतिद्वितीयो योगः॥ २४॥

तस्मिन्पापेनीचेऽतुंगेऽशुभसंयुक्तेच ॥ २५ ॥

कक्ष्याह्रासायतस्मिन्कारकेपापेनीचेसतिकक्ष्याह्रासः कारकेपापेऽतुंगेनुचराशौ ऽशुभसंयुक्तेचसतिकक्ष्याह्रासोभवतीतितृतीयोयोगः ॥ २९ ॥

अन्यदन्यथा ॥ २६ ॥

अथकक्ष्याह्रासयोगेअपवादमाह । अन्यथालग्नसप्तमयोः कारकसप्तमयोर्वाशुभ-ग्रहमध्यगतत्वेलग्नकारकाभ्यांकोणेषुशुभयोगेवा कारके शुभेऽनीचेवाकारके शुभेतुं-गेशुभसंयुक्ते चवा अन्यत्कक्ष्यावृद्धिरित्यर्थः । तथाचसर्वत्रयोगे पापात्मकेकक्ष्या-ह्रासः शुभात्मकेकक्ष्यावृद्धिः शुभपापरहितेनवृद्धिर्नह्रास इतिबोध्यम् ॥ २६ ॥

गुरौच ॥ २७ ॥

अथह्रासवृद्धिप्रकारान्गुरावपिदर्शयति । एवमित्यर्थः । गुरोर्द्विद्वादशषष्ठाष्टम-त्रिकोणेषुपापयोगेसतिकक्ष्याह्रासः गुरौनीचेअतुंगेऽशुभसंयुक्तेचकक्ष्याह्रासः अन्य-थाचेदन्यथेति प्राग्वद्योजना ॥ २७ ॥

पूर्णेन्दुशुक्रयोरेकराशिवृद्धिः ॥ २८ ॥

तत्रापवादंदर्शयति । उक्तस्थानेषुशुभग्रहयोगप्रकरणेपूर्णेंदुशुक्रयोर्योगेसति न कक्ष्यावृद्धिः किंत्वेकराशिवृद्धिरेवेत्यर्थः ॥ २८ ॥

शनौविपरीतम् ॥ २९ ॥

पापयोगेनयःकक्ष्याह्रासउक्तस्तत्रापवादंदर्शयति । शनावुक्तस्थानगेसति नक-क्ष्याह्रासः किंत्वेकराशिह्रासएवेत्यर्थः । अत्रचंद्रशुक्रशनीनांप्राधान्येनयोगकर्तृत्वे-नग्रहांतरेषुयोगकरेष्वपिएकराशेर्वृद्धिर्ह्रासोवास्यान्नतुकक्ष्याया इत्यर्थः ॥ २९ ॥

स्थिरदशायांयथाखंडंनिधनम् ॥ ३० ॥

अथसकलायुर्योगापवादत्वेननिधनयोगंस्थिरदशामालंब्याह । खंडमनतिक्रम्य यथाखंड स्थिरदशायां शशिनंदपावका इति वक्ष्यमाणायांदीर्घमध्याल्पायुर्भेदेनपूर्णा-युषस्त्रेधाखंडकरणाद्यः खंडः समागतस्तस्मिन्नेवखंडेनिधनं भवतीत्यर्थः । एवंचवक्-ष्यमाणप्रकारेणनिधनाश्रयखंडात्पूर्वखंडेनिधनलक्षणाक्रांतराशेर्दशायामागतायामपि ननिधनंस्यात् किंतु क्लेशः स्यात् ॥ ३० ॥

तत्रर्क्षविशेषः ॥ ३१ ॥

अथदीर्घमध्याल्पायुर्भेदेनमरणखंडेनिर्णीतेनविशेषतोमरणकालज्ञानमितः संभव-तीत्यत्राह । तत्रनिधनेऋक्षविशेषःराशिविशेषोस्तीत्यर्थः ॥ ३१ ॥

पापमध्येपापकोणेरिपुरोगयोःपापे वा ॥ ३२ ॥

सराशिविशेषः क इत्यपेक्षायामाह । पापद्वयमध्यगतराशिदशायांप्रथमदशाप्रद-राशेस्त्रिकोणेद्वादशाष्टमयोर्वापापयोगेसतितद्राशिदशायांनिधनंभवति । एतदुक्तंवृद्धैः—"शुभमध्येमृतिर्नैवपापमध्येमृतिर्भवेत्" इति । लग्नात्कारकाद्वापापाक्रांतत्रिकोणद-शायांपापाक्रांतद्वादशाष्टमराशिदशायांवानिधनंभवतीत्यन्ये ॥ ३२ ॥

तदीशयोःकेवलक्षीणेन्दुशुक्रदृष्टौवा ॥ ३३ ॥

पुनरपिनिधनेराशिविशेषमाह । तदीशयोर्द्वादशाष्टमेशयोर्ग्रहांतरदृष्टिरहितकेवल-क्षीणेन्दुशुक्रयोर्दृष्टौसत्यांद्वादशाष्टमराशिदशयोर्निधनंभवतीत्यर्थः । बहुवर्षव्यापि-न्यांदशायांकदामरणमित्याशंकायामाह ॥ ३३ ॥

तत्राप्याद्यर्क्षारिनाथदृश्यनवभागाद्वा ॥ ३४ ॥

तत्रापिनिधनस्थानत्वेनादिष्टासुपापमध्यराश्यादिदशासुआद्यर्क्षारिनाथौप्रथमद-शाप्रदराशितत्षष्ठराशिनाथौ ताभ्यांदृश्योयोनवमभागो नवांशकुंडल्यां राशिस्त-स्यांतर्दशायांवानिधनंभवतीत्यर्थः । ननुआद्यशब्देनदशमराशिः अरिशब्देनषष्ठरा-शिरितिकैश्चिद्व्याख्यातम् । तत्रवैषम्येबीजाभावादरिशब्देनाष्टमराशिः कुतोनगृह्यत इति । एवंचेन्मुनेस्तात्पर्यंतर्हितत्रापिरिष्फतंतुनाथदृश्यनवभागाद्वेतिकुतोनोक्तमित्य-लम् ॥ ३४ ॥

पितृलाभभावेशप्राणीरुद्रः ॥ ३५ ॥

अथनिर्याणदशाविशेषंप्रकारान्तरेणदर्शयितुंरुद्रग्रहंलक्षयति । लग्नसप्तमाभ्यां यावष्टमेशौतयोर्यः प्राणी बलवान् सरुद्रसंज्ञोग्रहोभवतीत्यर्थः ॥ ३५ ॥

अप्राण्यपि पापदृष्टः ॥ ३६ ॥

द्वितीयरुद्रमाह । लग्नसप्तमाभ्यांयोष्टमाधीशोदुर्बलः सोपिपापदृष्टश्चेद्रुद्रः स्यात् तथा चद्वौरुद्रौभवतःप्राणीअप्राणीचेति ॥ ३६ ॥

प्राणिनिशुभदृष्टेरुद्रशूलांतमायुः ॥ ३७ ॥

प्राणिरुद्रस्यफलमाह । बलवतिरुद्रेशुभदृष्टेसतिरुद्रशूलांतंरुद्रात्प्रथमपंचमनवमदशांतमायुर्भवति अल्पमध्यदीर्घायुर्योगभेदात्प्रथमद्वितीयतृतीयैस्त्रिकोणांतैरायुः- समाप्तं भवतीत्यर्थः ॥ ३७ ॥

तत्रापिशुभयोगे ॥ ३८ ॥

अप्राणिरुद्रेविशेषमाह । तत्रद्वितीयेरुद्रपिशुभयोगेसतिरुद्रशुलांतमायुर्भवति नतु शुभदृष्ट्येतिभावः ॥ ३८ ॥

व्यर्कपापयोगे न ॥ ३९ ॥

उक्तयोगे अपवादमाह । रविंविहायेतरपापयोगेसतिइदंफलंनभवतिरवियोगेतु नास्यफलस्यभंग इति ॥ ३९ ॥

मंदारेन्दुदृष्टेशुभयोगाभावेपापयोगेपिवाशुभदृष्टौ वापरतः ॥ ४० ॥

अथरुद्रद्वयस्यगुणविशेषेणफलंदर्शयति ।‌ प्राणिन्यप्राणिनिवारुद्रेमंदारेंदुदृष्टेशुभयोगाभावेएकोयोगः, मंदारेन्दुदृष्टेरुद्रद्वयेपापयोगेपिवाद्वितीयोयोगः, मंदारेन्दुदृष्टे रुद्रद्वयेशुभदृष्टौवासत्यांतृतीयोयोगः, प्रथमयोगेशुभयोगाभावेइत्यनेनपापयोगेद्वितीययोगेवक्तव्येशुभपापरहितेरुद्रेऽयमर्थःसंपन्नः योगत्रये संपूर्णेसतिरुद्रशूलांतात्परतोऽग्रे आयुःसमाप्तिर्भवतीत्यर्थः । वाकारद्वयमनास्थायामित्युक्त्वायोगद्वयपरमितिपरैरुक्तम् । तन्न । वाकारद्वयस्यानास्थाकल्पनायां प्रमाणाभावाद्योगत्रयपरमेववाकारद्वयेनलभ्यत इति । अस्मिन्प्रकरणेशुभपापा वृद्धैरुक्ताः " अर्कारमंदफणिनःक्रमात्क्रूरायथाश्रयम् ॥ चंद्रोपिक्रूरएवात्रकचिदंगारकाश्रये ॥ गुरुव्वजकविज्ञाःस्युर्यथापूर्वंशुभग्रहाः" इति । अयमर्थः । अत्रार्काद्याउत्तरोत्तरंयथाश्रयंक्रूरराशिगताःक्रूरा भवंति शुभराशिगतास्तुनपापाः किंतु शुभा एव गुर्वादयस्तु शुभाः यथापूर्वंबुधात्कविःकवेः केतुः केतोर्गुरुरितिक्रमेणोत्तरोत्तरंशुभा ....यथाक्रूराश्रये क्रूरत्वं

शुभाश्रयेशुभत्वं तथागुर्वादीनामपिशुभाश्रयेएवशुभता । नक्रूराश्रयेशुभता । एवमेव वृद्धैरप्युक्तम्– "प्रत्येकंशुभराशिस्थउच्चस्थोवाबुधःशुभः । गुरुशुक्रौचसौम्यस्थौ ततोन्यत्राशुभाःस्मृताः ॥" इति । यदिशूलेमृतिस्तर्हिकस्मिञ्शूलेस्यादित्यत्रवृद्धैर्विशेषोनिरुक्तः– "पापमात्रस्यशूलत्वेप्रथमर्क्षेमृतिर्भवेत् । मिश्रेमध्यमशूलर्क्षे शुभमात्रेंत्यभेमृतिः ॥" इति । अस्यार्थः । द्वौरुद्रौयदिपापौतर्हिप्रथमशूलेमृतिः स्यात्, यद्येकोरुद्रः शुभोऽपरः पापस्तर्हिमध्यशूलेमृतिः ॥ ४० ॥

रुद्राश्रयेपिप्रायेण ॥ ४१ ॥

द्वावपिरुद्रौयदिशुभौतर्ह्यंत्यशूलेमृतिःस्यादितिरुद्राश्रितराशावपिकदाचिन्मरणयोगमाह । रुद्राश्रयराशावप्यायुःसमाप्तिर्भवतीत्यर्थः । प्रायःशब्दाद्रुद्राश्रयात्पूर्वपरतो वाऽऽयुःसमाप्तिर्भवति इतिध्वनितम् ॥ ४१ ॥

क्रियेपितरिविशेषेण ॥ ४२ ॥

अत्रविशेषमाह । मेषेजन्मलग्नेसतिविशेषेणरुद्राश्रयेआयुःसमाप्तिर्भवति ॥ ४२ ॥

प्रथममध्यमोत्तमेषुवातत्तदायुषाम् ॥ ४३ ॥

योगभेदेननिधनस्थानंदर्शयति । तत्तदायुषामल्पमध्यदीर्घायुर्योगवतांप्रथममध्यमोत्तमेषुप्रथमद्वितीयतृतीयरुद्रशूलेषुवाक्रमेणायुःसमाप्तिर्भवति । रुद्रशूलराशिमहादशायांनिधनेसिद्धेकस्यामंतर्दशायांनिधनमित्यतआह । अत्रशूलेचेदित्युक्त्यारुद्रशूले निर्याणयोगेसत्यपिबलवत्तरयोगांतरवशतोरुद्रशूलनिर्याणबाधोपिभवतीतिध्वनितम् ४३

स्वभावेशोमहेश्वरः ॥ ४४ ॥

अथफलविशेषकथनायमहेश्वरग्रहंलक्षयति । स्वादात्मकारकाद्भावेशोऽष्टमराशीशोमहेश्वरग्रह इत्यर्थः ॥ ४४ ॥

स्वोच्चेस्वगृहेरिपुभावेशःप्राणी ॥ ४५ ॥

यदिकारकादष्टमेशःस्वोच्चेस्वगृहेवास्यात्तदाकारकाद् द्वादशाष्टमेशयोर्मध्येयोबलीसएवमहेश्वरःस्यान्नतुस्वभावेश इत्यर्थः । द्वावपितुल्यबलौचेद् द्वौमहेश्वरौभवत एव । स्वोच्चेसग्रहइतिपाठेतुकारकोच्चराशौग्रहयुक्तेसतिकारकादष्टमद्वादशेशयोर्मध्ये योबलीसमहेश्वरः । अस्मिन्पक्षेप्रकारांतरेणायमपिमहेश्वर इत्यर्थः ॥ ४५ ॥

पाताभ्यांयोगेस्वस्यतयोर्वारोगेततः ॥ ४६ ॥

प्रकारांतरेणमहेश्वरमाह । स्वस्यकारकस्यपाताभ्यांराहुकेत्वोरन्यतरेण योगेतया कारकाद्रोगेऽष्टमेतयोराहुकेत्वोर्योगेवासतिकारकाद्व्यादिप्रसिद्धगणनयाततः षष्ठो ग्रहोमहेश्वरोभवति । द्वित्राणांमहेश्वराणांसंभवेयोबलीसएव महेश्वरःस्यादिति ॥४६॥

प्रभुभाववैरीशप्राणीपितृलाभप्राण्यनचरोविषमस्थो ब्रह्मा ॥ ४७ ॥

अथब्रह्मग्रहमाह । पितृलाभप्राणीतिसूत्रमध्येस्थितत्वाद्देहलीदीपकन्यायेनलग्न-सप्तमयोर्योबलवद्राशिस्तस्मात्षष्ठाष्टमद्वादशराशिस्वामिनांमध्येयोबलवान्भवेद्विलग्न-तत्सप्तमराश्योर्मध्येयोबलवद्राशिस्तत्पृष्ठगश्चसमेषमिथुनादिविषमराशिगतःस्यात् स एवग्रहोब्रह्माभवतीति । लग्नस्यपृष्ठराशयः सप्तमादिद्वादशांताःसप्तमस्यपृष्ठराशयोल-ग्नादिषष्ठांतावोध्याः ॥ ४७ ॥

ब्रह्मणिशनौपातयोर्वाततः ॥ ४८ ॥

प्रकारांतरेणब्रह्माणमाह । शनौब्रह्मणिब्रह्मलक्षणाक्रांतेसतिपातयोराहुकेत्वोर्वा ब्रह्मणोःसतोस्तस्माच्छनेराहोःकेतोर्वाततःषष्ठो ग्रहोब्रह्माभवतीत्यर्थः । नतुब्रह्मलक्ष-णाक्रांततयाप्रसक्तः शन्यादिर्ब्रह्मास्यात् ॥ ४८ ॥

बहूनांयोगेस्वजातीयः ॥ ४९ ॥

बहूनांब्रह्मलक्षणाक्रांतत्वेकतमोब्रह्मास्यादित्याशंकायामाह । बहूनां ग्रहाणांब्रह्म-योगेसतिस्वजातीयः कारकजातीयोऽधिकांशको ब्रह्मास्यादित्यर्थः ॥ ४९ ॥

राहुयोगेविपरीतम् ॥ ५० ॥

अत्रैवविशेषमाह । राहोर्ब्रह्मणासहसंयोगेसतिविपरीतंबहूनांब्रह्मणांमध्येयोन्यूनां-शकःसएवब्रह्मास्यात् । शनिराहुकेतुनांततइत्युक्त्याब्रह्मत्वाभावत् ब्रह्मत्वेसतितुराहो-र्ब्रह्मत्वयोगेराहुन्यूनांशश्चेद्ब्रह्मास्यादित्यर्थः स्यादिति ॥ ५० ॥

ब्रह्मास्वभावेशोभावस्थः ॥ ५१ ॥

पुनःप्रकारांतरेणब्रह्माणमाह । कारकादष्टमेशः कारकादष्टमस्थश्चग्रहो ब्रह्मा स्यात् । यत्तुअष्टमेशत्वेसत्यष्टमराशिगतत्वमेवब्रह्मत्वेप्रयोजकत्वमितिमतम् । तन्न । तथासतिविधेयस्यभावस्थेतिसूत्रमनन्वितस्यात् । नह्यतत्पूर्वान्वितव्यवहितत्वाद्

ग्रंथास्वारस्यप्रसक्तेःबहूनामितिसूत्रेणैवशंकायाः उपक्षीणत्वाच्चेति अष्टमेशाष्टमस्थयोरेकत्वेनिर्विवादंब्रह्मत्वम् ॥ ५१ ॥

विवादेबली ॥ ५२ ॥

तयोर्भेदेतुकतमोभवेदित्यत्राह । विवादेद्वयोर्ब्रह्मत्वेसतियोबली स एव ब्रह्मास्यात् । अथवासर्वेषुब्रह्मसुसमानांशवत्सुयोऽग्रहात्सग्रहइत्यादिना बलीसब्रह्माभवतीत्यर्थः ५२॥

ब्रह्मणोयावन्महेश्वरर्क्षदशांतमायुः ॥ ५३ ॥

अथब्रह्ममहेश्वरयोःफलमाह । स्थिरदशायांब्रह्मग्रहाश्रितराशिमारभ्यमहेश्वरराशिदशापर्यंतमायुर्भवतीत्यर्थः ॥ ५३ ॥

तत्रापिमहेश्वरभावेशात्रिकोणाब्दे ॥ ५४ ॥

महादशायांनिधनाश्रयीभूतामंतर्दशामाह । तत्रापिमहेश्वराश्रितराशिमहादशायामपिमहेश्वराश्रितराशितोऽष्टमराशिनाथस्ययस्त्रिकोणराशिःप्रथमपंचमनवमात्मकोराशिस्तस्यैकद्व्यात्मकोर्योंतर्दशाकालस्तत्रमृत्युःस्यात् । अब्द इति । द्वादशवर्षैस्तत्तद्राशिदशेत्यभिप्रायेणन्यूनसंख्ययादशासत्त्वेत्वब्दतो न्यूनमंतर्दशास्वप्यानेयमेव ५४॥

स्वकर्मचित्तरिपुरोगनाथप्राणीमारकः ॥ ५५ ॥

अथसूत्रद्वयेनमारकग्रहंलक्षयति । चित्तनाथःप्रायेणस्वस्मादात्मकारकात्तृतीयषष्ठद्वादशाष्टमेशानांमध्येयोबलवान् समारकग्रहइत्यर्थः । सर्वेषां समबलत्वेसर्वेपिमारकाःस्युः । बहूनांमारकत्वेकस्यांदशायांनिधनमित्याशंकायामल्पमध्यदीर्घायुषांयत्रयत्रयस्यसंभवस्तद्राशिदशायांनिधनमित्यर्थः । षष्ठेशस्तुप्रायेणमुख्यतयामारक इत्यर्थः । अत्रवृद्धैरप्युक्तम्– "षष्ठाष्टमेशौभवतोमारकावष्टमेश्वरः । प्रायेणमारको राशिदशास्वत्राविशेषतः ॥ षष्ठेपापभूयिष्ठेषष्ठेशोमुख्यमारकः । षष्ठात्त्रिकोणगोवाऽपिमुख्यमारक इष्यते ॥ मध्यायुषिमृतिःषष्ठदशायामष्टमस्यवा । षष्ठत्रिकोगस्यपुनर्दीर्घाल्पविषयेभवेत् ॥ षष्ठेबलयुतेतस्यत्रिकोणेमृतिमादिशेत् । षष्ठेशश्चेद्बलाढ्यःस्यात्तत्त्रिकोणेमृतिंवदेत् ॥" इति "व्यवस्थेयं समस्तापिकारकादिदशास्वपि । बलिनः शुक्रशशिनोर्ग्राह्यंषष्ठाष्टमादिकम् ॥ " श्लोकाः स्पष्टार्थाः ॥ ५५ ॥

तद्दक्षदशायां निधनम् ॥ ५६ ॥

मारकस्यफलमाह । मारकग्रहाश्रितस्यमारकस्वामिकस्यवामहादशायां चरस्थिरादिरूपायांनिधनंस्यादित्यर्थः ॥ ५६ ॥

तत्रापि कालाद्रिपुरोगचित्तनाथापहारे ॥ ५७ ॥

मारकमहादशायांनिधनाश्रयीभूतामंतर्दशामाह । तत्रापिमारकग्रहदशायामपि कालात्कारकसप्तमाद्वादशाष्टमषष्ठेशानामंतर्दशायांनिधनंस्यादित्यर्थः । एषांमध्येब-लवतोंतर्दशायांनिधनमितिविवेचनीयम् । अत्रविशेषोवृद्धैरुक्तः— " चरेचरस्थिरद्वंद्वा इतियोराशिरागतः । सएवमारकोराशिर्भवतीतिविनिर्णयः ॥ बहुराशिसमावेशेबल-वान्मारकः स्मृतः ।" इति । अयंभावः । पितृदिनेशादिद्विकानामाश्रयीभूतोयो-राशिः स मारकस्ते राशयोयदिबहवस्तर्हिअग्रहात्सग्रहइत्यादिबलेनयोराशिर्बलवान् समारकस्तद्राशिदशायांतदीशाश्रयराशिदशायांवामृतिरिति । अपरेतु— " चरइ-त्यादिनायुर्यत्तत्समाप्त्युचितोभवेत् । योराशिःसतुविज्ञेयोमारकःसूत्रसंमतः ॥" इति । चरइत्यादिश्लोकेनयद्दीर्घाद्यायुः समागतंपूर्णमित्यादिनास्पष्टीकृतंतदायुर्यद्राशौसमाप्तं तद्राशिरेवमारक इत्यर्थः ॥ ५७ ॥

इति द्वितीयाध्यायस्य प्रथमः पादः ॥ १ ॥

इतिजैमिनीयसूत्रव्याख्यायांसुबोधिन्यां द्वितीयाध्यायस्यप्रथमःपादः ॥ १ ॥

रविशुक्रयोःप्राणीजनकः ॥ १ ॥

पित्रादीनांनिधनकालंबोधयितुंपित्रादिकारकमुपदिशति । सूर्यभार्गवयोर्मध्येयो बलवान्सपितृकारकःस्यात् ॥ १ ॥

चन्द्रारयोर्जननी ॥ २ ॥

चंद्रभौमयोर्योबलीसमातृकारकः ॥ २ ॥

अप्राण्यपि पापदृष्टः ॥ ३ ॥

रविशुक्रयोश्चंद्रारयोश्चमध्येयोनिर्बलः सोपिपापग्रहदृष्टश्चेद्यथाक्रमंपितृमातृकार-कतांलभते ॥ ३ ॥

प्राणिनि शुभदृष्टे तच्छूले निधनं मातापित्रोः ॥ ४ ॥

अथप्राणिपित्रादिकारकस्यफलमाह । पितृकारकेमातृकारकेवाप्राणिनि शुभदृ-ष्टसतिपितृमातृकारकाश्रितराशित्रिकोणदशायांमातापित्रोर्मरणंज्ञेयम् ॥ ४ ॥

तद्भावेशे स्पष्टबले ॥ ५ ॥

द्विविधकारकस्यफलमाह । स्पष्टम् ॥ ५ ॥

तच्छूल इत्यन्ये ॥ ६ ॥

ताभ्यांप्राण्यप्राणिकारकाभ्यांभावेशेऽष्टमेशेपितृमातृकारकात्स्पष्टबलेऽधिकबलेसत्यष्टमेशाश्रितराशितस्त्रिकोणराशिदशायांनिधनंभवतीत्यन्येप्राहुः । अधिबल इतिवक्तव्ये स्पष्टबलइत्युक्त्यांशाधिक्यबलमत्रग्राह्यम् ॥ ६ ॥

आयुषि चान्यत् ॥ ७ ॥

पित्रादीनामायुषिविचारणीयेऽन्यच्चतत्तत्कारकंप्रकारांतरोक्तनिर्याणशूलदशादिकंचविचार्यमित्यर्थः ॥ ७ ॥

अर्कज्ञयोगे तदाश्रये लग्नमेषदशायां पितुरित्येके ॥ ८ ॥

पितृनिधनेविशेषमाह । क्रियेलग्नाद्द्वादशराशौतदाश्रयेर्कबुधाश्रयेसिंहमिथुनकन्यान्यतरराशिसत्त्वेऽर्कज्ञयोगेसूर्यबुधयोर्योगेसतिलग्नमेषदशायांलग्नात्पंचमराशिदशायांपितुर्निधनंस्यादित्येकेवदंति । लग्नेइतिपाठेतुक्रियेमेषराशौरविज्ञयोगाश्रयेलग्नेसति मेषस्यदशायांपितुर्निधनमित्यर्थः ॥ ८ ॥

ऽर्यर्कपापमात्रदृष्टयोः पित्रोः प्राग्द्वादशाब्दात् ॥ ९ ॥

अथ बाल्यएवमातापित्रोर्मरणयोगमाह । पित्रोःमातापितृकारकयोः प्राणिनोरप्राणिनोर्वारविरहितपापमात्रेणदृष्टयोःसतोर्द्वादशाब्दात्पूर्वमेवमातापित्रोर्यथाक्रमंनिधनंभवति । रविशुभदृष्टौनायंयोग इति ॥ ९ ॥

गुरुशूले कलत्रस्य ॥ १० ॥

स्त्रीनिधनमाह । गुर्वाश्रितराशित्रिकोणदशायांपत्नीनिधनंस्यात् ॥ १० ॥

तत्तच्छूले तेषाम् ॥ ११ ॥

एवमन्येषामपिनिधनमाह । पुत्रमातुलादिकारकराशेस्त्रिकोणदशायां पुत्रमातुलादेर्निधनमित्यर्थः ॥ ११ ॥

कर्मणि पापयुतदृष्टे दुष्टं मरणम् ॥ १२ ॥

मरणेशुभाशुभभेदंदर्शयतिसूत्रैः । लग्नात्कारकाद्वातृतीयेपापेनयुतेदृष्टेवादुष्टंमरणंभवति ॥ १२ ॥

शुभं शुभदृष्टियुते ॥ १३ ॥

लग्नात्कारकात्तृतीयेशुभेनयुक्तेदृष्टेवाशुभंमरणंस्यात् । अग्निजलपातबंधनादिप्रयोज्यं दुष्टमरणं, ज्वरादिरोगप्रयोज्यंशुभमुच्यते ॥ १३ ॥

मिश्रे मिश्रम् ॥ १४ ॥

शुभपापयोर्द्वयोरपिदृष्टौयोगे वा शुभाशुभात्मकंमरणमित्यर्थः ॥ १४ ॥

आदित्येन राजमूलात् ॥ १५ ॥

मरणनिमित्तानिदर्शयति । तृतीयेरवियोगेदृष्टौवासत्यांराजहेतोर्मरणम् ॥ १५ ॥

चंद्रेण यक्ष्मणः ॥ १६ ॥

तृतीयेचंद्रेणयुतेदृष्टेवायक्ष्मतःक्षयरोगान्मरणम् ॥ १६ ॥

कुजेन व्रणशस्त्राग्निदाहाद्यैः ॥ १७ ॥

तृतीयेकुजेनयुतेदृष्टेवाव्रणादितोनिधनम् ॥ १७ ॥

शनिनावातरोगात् ॥ १८ ॥

तृतीयेशनिनायुतेदृष्टेवावातरोगतोनिधनम् ॥ १८ ॥

मंदमांदिभ्यां विषसर्पजलोद्बंधनादिभिः ॥ १९ ॥

तृतीयेशनिगुलिकाभ्यांयुतेदृष्टेवाविषादिभिर्मरणम् । गुलिकस्यस्पष्टीकरणमन्यत्रानुसंधेयम् ॥ १९ ॥

केतुनाविषूचीजलरोगाद्यैः ॥ २० ॥

तृतीयेकेतुनायुतेदृष्टेवाविषूच्यादितोमरणम् ॥ २० ॥

चंद्रमांदिभ्यांपूगमदान्नकवलादिभिः क्षणिकम् ॥ २१ ॥

तृतीयेचंद्रगुलिकाभ्यांयुतेदृष्टेवाक्रमुकमदादिनात्वरंमरणम् ॥ २१ ॥

गुरुणाशोफाऽरुचिवमनाद्यैः ॥ २२ ॥

तृतीयेगुरुणायुतेदृष्टेवाशोफादिभिर्निधनम् ॥ २२ ॥

शुक्रेणमेहात् ॥ २३ ॥

तृतीयेशुक्रेणयुतेदृष्टेवाप्रमेहरोगान्निधनम् ॥ २३ ॥

मिश्रेमिश्रात् ॥ २४ ॥

तत्तद्रोगाणांबहूनांतृतीयेयोगेदर्शनेवाऽनेकरोगान्निधनम् ॥ २४ ॥

चंद्रदृग्योगान्निश्चयेन ॥ २५ ॥

तृतीयेतत्तद्ग्रहयोगदर्शनसत्त्वेतत्रैवचंद्रदृष्टियोगसत्त्वेतत्तद्रोगान्निश्चयेन मरणं वक्तव्यमित्यर्थः । एतेनचंद्रदृग्योगाभावेतृतीयस्थानगेनापितत्तद्ग्रहेण तत्तद्रोगमरणे संदेहइतिध्वनितम् ॥ २५ ॥

शुभैःशुभेदेशे ॥ २६ ॥

अथनिधनेदेशभेदंदर्शयति सूत्राभ्याम् । स्पष्टम् । अत्रबहुत्वमविवक्षितं तृतीयेशुभदृग्योगसत्त्वे शुभेदेशेपुण्यभूमौमरणम् ॥ २६ ॥

पापैःकीकटे ॥ २७ ॥

पापैस्तुकीकटेमगधादिपापदेशेमरणमित्यर्थः । शुभपापोभययोगेतुनकाश्यादिशुभेनमगधादिपापेदेश इति ॥ २७ ॥

गुरुशुक्राभ्यांज्ञानपूर्वम् ॥ २८ ॥

मृतौज्ञानाज्ञानपूर्वकत्वमाह । स्पष्टम् ॥ २८ ॥

अन्यैरन्यथा ॥ २९ ॥

लग्नात्कारकात्तृतीयेगुरुशुक्राभ्यांयुतेदृष्टेवाज्ञानपूर्वमरणम् । गुरुशुक्रातिरिक्तयोगदर्शनाभ्यामज्ञानपूर्वमरणम् ॥ २९ ॥

लेपनजनकयोर्मध्येशनिराहुकेतुभिःपित्रोर्नसंस्कर्ता ॥ ३० ॥

फलांतरमाह । लग्नद्वादशयोर्मध्येशनिराहोःशनिकेत्वोर्वास्थित्यामातापित्रोःसंस्कर्तानस्यात् ॥ ३० ॥

लेपादिपूर्वार्द्धेजनकाद्यपरार्द्धे ॥ ३१ ॥

लग्नद्वादशमध्यंप्रकटयति । लग्नादिपूर्वार्द्धेलग्नादिप्रथमषट्केद्वादशाद्यपरार्द्धेद्वाद-

ञाद्युत्तरषट्केशनिराहुशनिकेतुसत्त्वेमातृपित्रोः क्रमात् संस्कर्तान । तथाचलग्ना-दिषट्केशनिराहुशनिकेतुसत्त्वेमातुः संस्कर्ता न । सप्तमादिषट्केशनिराहुशनिके-तुसत्त्वेपितुः संस्कर्तानेतिफलितोर्थः । शन्यादित्रिकसत्त्वे इतिकुतोनोक्तमितिचेत् राहुकेत्वोरेकस्थानस्थितेर्बाधत्वान्नोक्तमिति ॥ ३१ ॥

शुभदृग्योगान्न ॥ ३२ ॥

अपवादमाह । तत्रलग्नादिद्वादशादिमध्येशुभदृग्योगसत्त्वेपूर्वोक्तयोगो न स्यात्किं तुपित्रोःसंस्कर्तास्यात् ॥ ३२ ॥

इतिद्वितीयाध्यायस्यद्वितीयःपादः ॥ २ ॥

इति जैमिनीयसूत्रव्याख्यायांसुबोधिन्यांद्वितीयाध्यायस्यद्वितीयःपादः ॥ २ ॥

विषमेतदादिर्नवांशः ॥ १ ॥

अथदशाभेदबलभेदादीनाह तत्रादौनवांशदशामाह । विषमेलग्नेसतितदादिर्ल-ग्नादिर्नवांशदशास्यात् । अन्यथासप्तमराशौलग्नेसत्यादर्शादिः सप्तमराश्यादिर्नवांश-दशास्यात् । आदर्शःसंमुखोभवति संमुखराशिः सप्तमएवभवति एतद्दशायांप्रति-राशिनवनवाब्दाभवंतीतिनवांशदशेतिनामधेयंज्ञेयम् । यत्तु—" स्थिरराशेःषष्ठराशि-श्चरस्याष्टमएवसः । द्विस्वभावस्यराशिस्तुसप्तमः संमुखोमतः ।" इतिश्लोकंकृत्वासं-मुखत्वंपंथैरुक्तं तन्न । तद्दृष्टिपरमेवनत्वन्यपरम् ॥ १ ॥

अन्यथाऽऽदर्शादिः ॥ २ ॥

अथस्थिरदशामाह । स्पष्टम् ॥ २ ॥

शशिनंदपावकाःक्रमादब्दाःस्थिरदशायाम् ॥ ३ ॥

चरस्थिरद्विस्वभावराशीनांक्रमेणसप्ताष्टनवाब्दानियताःस्थिरदशायांभवंतीत्यर्थः तथाचमेषेसप्तवृषेष्टौमिथुनेनव पुनः कर्केसप्तेत्यादिक्रमेणद्वादशराशिपर्यंतमब्दाज्ञा-तव्याः ॥ ३ ॥

ब्रह्मादिरेषा ॥ ४ ॥

एतद्दशारंभस्थानमाह । एषादशाब्रह्मग्रहादिर्ब्रह्मग्रहाश्रितराशिमारभ्यप्रवर्तनीये-त्यर्थः ॥ ४ ॥

अथप्राणः ॥ ५ ॥

अथबलमधिकरोति । अथानंतरंप्राणोबलमुच्यते ॥ ५ ॥

कारकयोगःप्रथमोभानाम् ॥ ६ ॥

राशीनामाद्यंबलंकारकयोगोभवति ॥ ६ ॥

साम्येभूयसा ॥ ७ ॥

ग्रहयोगसाम्येउभयत्रग्रहसत्त्वेसतिभूयसाग्रहयोगेनबलंभवति । ग्रहयोगभूय-स्त्वादिभिरपिसाम्येनिर्णायकमाह ॥ ७ ॥

ततस्तुंगादिः ॥ ८ ॥

ततोभूयस्त्वानंतरंतुंगादिर्बलंस्यात् । राशेस्तुंगस्वगृहस्थमित्रगृहस्थग्रहयोगः प्राण इत्यर्थः ॥ ८ ॥

निसर्गस्ततः ॥ ९ ॥

अथराशीनांनिसर्गबलमाह । ततस्तुंगादिबलानंतरंनिसर्गबलंप्राह्यंचरात्स्थिरः स्थिराद्द्विस्वभावोबलीत्यर्थः । तदुक्तंवृद्धैः—" अग्रहात्सग्रहोज्यायान्सग्रहेष्वधिक-ग्रहः । साम्येचरस्थिरद्वंद्वाःक्रमात्स्युर्बलशालिनः ॥" इति ॥ ९ ॥

तदभावेस्वामिन इत्थंभावः ॥ १० ॥

राशौतदभावेकारकयोगाद्यभावेस्वामिनोराश्याधिपतेरित्थंभावः कारकयोगा-दिर्बलं, यद्राशिनाथोबलवान्सराशिर्बलीतिभावः ॥ १० ॥

आग्रायतोत्रविशेषात् ॥ ११ ॥

एकराशौबहुग्रहेषुसत्सुतेषांराशिद्वारकबलसाम्येपिअत्रास्मिन्ग्रंथेआग्रायतोग्रहोवि-शेषाद्बलीभवति । अग्रमायतःगतः अग्रायतः, अग्रायत एव आग्रायतः अधिकांश-कइतियावत् । तथाचबहुग्रहेष्वेकराशिस्थेष्वधिकांशोबलवानिति ॥ ११ ॥

प्रातिवेशिकः पुरुषे ॥ १२ ॥

पुरुषेओजराशौ प्रातिवेशिकः पार्श्वराशिवर्तीद्विद्वादशगतोपिग्रहः स्वस्यबलकर्त्ता स्यात् ॥ १२ ॥

इतिप्रथमः ॥ १३ ॥

इति प्रोक्तप्रकारेणप्रथमः प्राणउक्त इत्यर्थः ॥ १३ ॥

स्वामिगुरुज्ञदृग्योगोद्वितीयः ॥ १४ ॥

स्वामियोगोगुरुयोगोबुधयोगश्चैकैकशोराशीनांबलंभवति । स्वामिदृष्टिर्गुरुदृष्टि-र्बुधदृष्टिश्चैकैकशोद्वादशराशीनांबलंस्यात् । एवंषड्बलानिद्वितीयः प्राणइत्यभिधी-यते । द्वितीयंभावबलमित्यग्रिमसूत्रेद्वितीयंबलंग्राह्यमितिस्पष्टीकृतम् ॥ १४ ॥

स्वामिनस्तृतीयः ॥ १५ ॥

स्वामिनोराश्यधिपतेर्वक्ष्यमाणः प्राणस्तृतीयः प्राणइत्यर्थः ॥ १५ ॥

स्वात्स्वामिनःकंटकादिष्वपारदौर्बल्यम् ॥ १६ ॥

अथस्वामिबलाबलेदर्शयति । स्वादात्मकारकात्कंटकादिषुकेंद्रपणफरापोक्लिमेषु स्वामिनोऽपारदौर्बल्यंभवति । केंद्रेशून्यंपणफरेएकम्आपोक्लिमेद्विगुणंदौर्बल्यंभवति १६

चतुर्थतःपुरुषे ॥ १७ ॥

चतुर्थतः पापदृग्योगइत्यादिनावक्ष्यमाणचतुर्थबलादपिपुरुषेविषमराशौ बलं भवतीत्यर्थः । यत्तु चतुर्थतः प्रथमांतात्तसिरित्युक्त्वापुरुषेचतुर्थःप्राण इतिकैश्चि-दुक्तं तदयुक्तम् । एवंचेन्मुनेस्तात्पर्यंतर्हिचतुर्थः पुरुषे इत्येवब्रूयात् चतुर्थबलंकि-मितिशंकानिरासायेति चत्वारइत्यग्रेवक्ष्यति । ननुतद्बलमप्यत्रैवकुतोनोक्तमितिचेत् तद्बलस्यसांप्रतमनुपयोगादुपयोगिबलमुक्त्वाकाश्चनदशाःप्रदर्श्यवक्ष्यतीति ॥ १७ ॥

पितृलाभप्रथमप्राण्यादिशूलदशानिर्याणे ॥ १८ ॥

अथनिर्याणशूलदशामाह । लग्नसप्तमयोर्यः प्रथमबलवांस्तदादिगणनयाप्रवृत्त-दशापापदालग्नसप्तमान्यतरत्रिकोण १।५।९। राशिदशातदानिर्याणंभवतीत्यर्थः । अत्रनवनचान्द्रामाहा: पुनःपेसमाः सामान्यइतिसूत्रस्यवक्तव्यत्वात् ॥ १८ ॥

पितृलाभपुत्रःप्राण्यादिःपितुः ॥ १९ ॥

पितुर्निर्याणदशामाह । लग्नसप्तमयोर्यौपुत्रराशिनवमराशीतयोर्मध्येयोबलवान् तमारभ्यक्रमेणप्रवर्तितयादशयाप्रोक्तरीत्याशूलदशायांपितुर्निर्याणं भवति ॥ १९ ॥

आदर्शादिर्मातुः ॥ २० ॥

मातुर्निर्याणदशामाह । लग्नात्सप्तमाद्वाबलिनश्चतुर्थराशेःशूल १ । ५ । ९ दशायांमातुर्निर्याणंस्यात् ॥ २० ॥

कर्मादिर्भ्रातुः ॥ २१ ॥

लग्नात्सप्तमाद्वाबलिनस्तृतीयराशेः शूलदशायांभ्रातुर्निर्याणम् ॥ २१ ॥

मात्रादिर्भगिनीपुत्रयोः ॥ २२ ॥

मातृआदिरितिपदच्छेदः । लग्नात्सप्तमाद्वाबलिनः पंचमराशेःप्रवृत्तशूलदशायां भगिनीपुत्रयोर्निर्याणम् ॥ २२ ॥

व्ययादिर्ज्येष्ठस्य ॥ २३ ॥

लग्नात्सप्तमाद्वाबलिनएकादशराशेःप्रवृत्तायांदशायांततः शूलदशायांज्येष्ठभ्रातु-र्निर्याणम् ॥ २३ ॥

पितृवत्पितृवर्गः ॥ २४ ॥

लग्नात्सप्तमाद्वाबलिनोनवमराशेःप्रवृत्तायांदशायांततःशूलदशायांपितृवर्गस्यपि-तृव्यादेर्निर्याणंस्यात् ॥ २४ ॥

ब्रह्मादिपुरुषेसमादासांताः ॥ २५ ॥

अथब्रह्मदशामाह । पुरुषेविषमेजन्मलग्नेसतिब्रह्मादिब्रह्मग्रहाश्रितराशितोदशाः प्रवर्तनीयाः समादासांताः।कोर्थः । स्वराशेःषष्ठराशिस्वाम्यंतं समादशाब्दाग्राह्याः । ननुदासांतशब्देनषष्ठराशिस्वाम्यंतमित्यर्थः कथमितिचेच्छृणु । षष्ठराश्यंतवर्षानय-नेसर्वेषांसमत्वाद्वासप्तत्युत्तरवर्षाभावाचायोग्यत्वात्स्वाम्यंतमित्यर्थः संपन्नइतिचेद्वर्षा-नयनेब्रह्मादिगणनावदापुरुषेब्रह्मादिसमादासांता इतिसूत्रंप्रणीतंस्यादित्यलम् ॥२५॥

स्थानव्यतिकरः ॥ २६ ॥

तत्रस्थानव्यतिकरः सप्तमसंबंधोस्ति । अयंभावः । विषमेआदौब्रह्माश्रितराशि-दशा ततःक्रमेणान्येषां, समेलग्नेतुआदौब्रह्माश्रितराशि[illegible]ततोव्युत्क्रमेणान्येषां

राशीनांदशाः विषमेब्रह्मादिसमेतुब्रह्मसप्तमादिक्रमव्युत्क्रमभेदेनदशाआनेयाइति फलितार्थः ॥ २६ ॥

पापदृग्योगस्तुंगादिग्रहयोगः ॥ २७ ॥

अथचतुर्थबलमाह । पापग्रहाणांदृष्टिर्योगश्चराशेर्बलंभवति तुंगमूलत्रिकोणस्वर्क्षातिमित्रमित्रराशिस्थितशुभग्रहयोगश्चबलंस्यादित्यर्थः । यत्तुतुंगादीतिग्रहयोगविभागंकृत्वातुंगादिबलंग्रहयोगबलंचेत्युक्तंपंथैस्तन्न पापदृग्योग इतिसूत्रेणपापयोगबलमुक्तमेवग्रहयोगइतिसूत्रेणैवतदर्थलाभात्पापदृगित्येववक्तव्येयोगपदंव्यर्थस्यात् । तस्मात्पापग्रहाणांयत्रकुत्रस्थितानामपियोगेबलं शुभग्रहाणांतुंगादिस्थानामेवयोगेबलंनत्वन्यत्रस्थानामितिभावः । इतिचत्वारःकारकयोगा इत्यादिना त्रयः पूर्वोक्ताः एकोऽयमितिचत्वारःप्राणाइत्यर्थः ॥ २७ ॥

पंचमेपदक्रमात्प्राक्प्रत्यक्त्वम् ॥ २८ ॥

पूर्वोक्तचरदशायांक्रमव्युत्क्रमभेदमाह । त्रिभिस्त्रिभिर्भैरसमंचपदानिचत्वारिभवंति चक्रइति लग्नान्नवमेओजपदांतर्गतराशिश्चेत्क्रमाद्युग्मपदांतर्गतराशिश्चेद्व्युत्क्रमाद्दशानेयापूर्वंचरदशावर्षानयनमात्रमुक्तंक्रमव्युत्क्रमभेदस्तुनोक्तस्तस्मादत्रोक्तंदशारंभावधेरनुक्तत्वाल्लग्नमेवात्रग्राह्यमिति ॥ २८ ॥

चरदशायामत्रशुभःकेतुः ॥ २९ ॥

अस्यांचरदशायांकेतुःशुभःशुभग्रहफलद इति ॥ २९ ॥

इतिद्वितीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

इतिश्रीजैमिनीयसूत्रव्याख्यायां सुबोधिन्यांद्वितीयाध्यायस्यतृतीयःपादः ॥ ३ ॥

द्वितीयंभावबलंचरनवांशे ॥ १ ॥

चरराशेर्नवांशदशायांद्वितीयंभावबलंस्वामिगुरुज्ञदृग्योग इति फलादेशायग्राह्यमित्यर्थः ॥ १ ॥

दशाश्रयोद्वारम् ॥ २ ॥

अथद्वारबाह्यराशीदर्शयति । स्पष्टम् ॥ २ ॥

ततस्तावतिथंबाह्यम् ॥ ३ ॥

यस्मिन्कालेयस्यराशेर्योदशा चरस्थिरपर्यायतस्तद्दशाश्रयोराशिर्द्वारमित्युच्यते एन-मेवपाकराशिरितिव्यवहरंति । लग्नाद्यावत्संख्याकोद्वारराशिस्तस्मात्तावत्संख्याको राशिर्बाह्यमितिनिगद्यते एनमेवभोगराशिंवदंति । अत्रलग्नशब्देनजन्मकालेयद्राशितः प्राथमिकीदशा समारभ्यतेसराशिर्ग्राह्यः । लग्नंसप्तमोवात्रब्रह्मग्रहाद्याश्रितराशिर्वायथायोगमाद्यदशाश्रयराशिरेवपाकराशेरवधिर्नतुप्रसिद्धंलग्नम् । एवंचेन्नोच्यतेतर्हि "सएवभोगराशिश्चपर्यायेप्रथमेस्मृतः" इतिनलगति । यत्रसप्तमाद्ब्रह्माश्रितराशितोवादशा-प्रवृत्तिस्तत्र यः पाकराशिः सएवभोगराशिरितिनसंभवति । तदुक्तंवृद्धैः– "चरेऽनुज्झितमार्गःस्यात्षष्ठषष्ठादिकः स्थिरे । उभयेकंटकाज्ञेयालग्नपंचमभाग्यतः ॥ चरस्थिरद्विस्वभावेस्वोजेषुप्राक्क्रमोमतः । तेष्वेवत्रिषुयुग्मेषुग्राह्यं व्युत्क्रमतोखिलम् ॥ एवमुल्लिखितोराशिःपाकराशिरितिस्मृतः । सएवभोगराशिश्चपर्यायेप्रथमेस्मृतः ॥ लग्नाद्यावतिथःपाकःपर्यायेयत्रदृश्यते । तस्मात्तावतिथोभोगःपर्यायेतत्रगृह्यताम् ॥ तदिदंचरपर्यायस्थिरपर्याययोर्द्वयोः । त्रिकोणाख्यदशायांचपाकभागेप्रकल्पनम् ॥" इति । पर्यायेदशायामित्यर्थः ॥ ३ ॥

तयोःपापेबंधयोगादिः ॥ ४ ॥

अथद्वारबाह्ययोःफलमाह त्रिभिस्सूत्रैः । तयोर्द्वारबाह्ययोः पापग्रहे सति तद्दशा-यांबंधादिःस्यात् । तदुक्तंवृद्धैः–"पाकेभोगेचपापाढ्येदेहपीडामनोव्यथा ।" इति ४

स्वर्क्षेस्यतस्मिन्नोपजीवस्य ॥ ५ ॥

तस्मिन्द्वारेबाह्येवाराशौपापाश्रयीभूतेऽस्यपापस्यपरंतूपजीवस्यउपसमीपे जीवोय-स्येतिगुरुसमीपवर्तिनःस्वर्क्षेस्थितौसत्यांनबंधादिरित्यर्थः । पाकभोगाश्रितः पापोय-दिस्वर्क्षेगुरुयुक्तस्तर्ह्युक्तदोषोनेतियावत् ॥ ५ ॥

भग्रहयोगोक्तंसर्वमस्मिन् ॥ ६ ॥

अस्मिन्द्वारेबाह्येवाराशिखेटाभ्यांयातायेयोगास्तेषूक्तं सर्वशुभाशुभंफलं वेदित-व्यमित्यर्थः ॥ ६ ॥

पितृलाभप्राणितोयम् ॥ ७ ॥

अथकेंद्रदशारंभस्थानभेदंदर्शयति । लग्नसप्तमयोर्बलवात्राशिस्तस्मादयंवक्ष्यमा-

णदशाक्रमोज्ञेयस्तंराशिमारभ्यदशाप्रवर्तनीयेतियावत् । तदुक्तंवृद्धैः—"बलिनःशुक्रशशिनोःकेंद्राख्यांतुदशांनयेत । पुरुषश्चेत्ततोनेयास्त्रीचेद्दर्पणतोनयेत् ॥" अयमर्थः । पुरुषोजातकवांश्चेल्लग्नसप्तमयोर्बलवतोर्दशानेया, स्त्रीजातकवतीचेद्बलवत्सप्तमाद्दशानेयेति ॥ ७ ॥

प्रथमेप्राक्प्रत्यक्त्वम् ॥ ८ ॥

केंद्रदशाक्रमभेदानाहसूत्रैः । प्रथमेचरराशौलग्नेसप्तमेवासतिबलवल्लग्नसप्तमान्यतरराशिरनुज्झितमार्गेणदशाक्रमःस्यात् तत्राप्योजयुग्मपदभेदात्प्राक्प्रत्यक्त्वंक्रमोत्क्रमत्वं प्रथमद्वितीयादिद्वादशादिरीत्याज्ञेयमित्यर्थः । यत्तुसामान्यपरिभाषातःप्राक्प्रत्यक्त्वंप्राप्तमेवात्रत्यप्राक्प्रत्यक्त्वपदमनुज्झितक्रमपदमितिपंथैरुक्तं तन्न सामान्यपरिभाषायादशानयनपरत्वात् । नचैवंसत्यनुज्झितक्रमरूपोर्थोनस्यादितिवाच्यंस्थिरद्वयंगयोः षष्ठकेंद्रादिक्रमयोर्वक्ष्यमाणत्वादत्राक्षेपादेवतल्लाभात् । अन्यथा लाघवात्प्रथमेक्रयतइत्येवंब्रूयात् । अत्रत्यंपंचमेपदक्रमादितिसूत्रोक्तंचप्राक्प्रत्यक्त्वपदंदशाक्रमेण सामान्यपरिभाषाऽप्राप्तोलिंगम् ॥ ८ ॥

द्वितीयेरवितः ॥ ९ ॥

द्वितीयेस्थिरराशौलग्नेसप्तमेवासतिबलवल्लग्नसप्तमान्यतमराशेः ओजयुग्मपदभेदात्क्रमोत्क्रमाभ्यांरवितःषष्ठषष्ठक्रमेण दशाप्रवृत्तिर्ज्ञेयेत्यर्थः ॥ ९ ॥

पृथक्क्रमेणतृतीयेचतुष्टयादि ॥ १० ॥

तृतीयेद्विस्वभावराशौलग्नेसप्तमेवासति बलवल्लग्नसप्तमान्यतमराशेश्चतुर्थादिकेन्द्रादितः पृथक्क्रमेणलग्नपंचमनवमादितः ओजयुग्मपदभेदात्क्रमोत्क्रमाभ्यांदशाप्रवृत्तिःस्यात् । लग्नसप्तमान्यतरकेंद्रात्प्रथमं ततः पंचमपणफरतः ततोनवमापोक्लिमतोदशाप्रवृत्तिर्ज्ञेयेतियावत् । अत्रनवनवाब्दाग्राह्याः । एतत्सूत्रत्रयस्यफलितोर्थो वृद्धैः स्पष्टीकृतः— "चरेनुज्झितेमार्गःस्यात्षष्ठषष्ठादिकाः स्थिरे । उभयेकंटकाज्ञेयालग्नपंचमभाग्यतः ॥ चरस्थिरद्विस्वभावेष्वोजेषुप्राक्क्रमोमतः । तेष्वेवत्रिषुयुग्मेषुग्राह्यंव्युत्क्रमतोखिलम् ॥" ओजेषुओजपदेष्वित्यर्थः ॥ १० ॥

स्वकेंद्रस्थाद्याःस्वामिनोनवांशानाम् ॥ ११ ॥

अथकारककेंद्रादिदशामाह । नवांशदशाब्दानांस्वकेंद्रस्थाद्याः कारककेंद्रस्थाद्याराशयःस्वामिनोभवंति । आदौकेंद्रस्थास्ततः[illegible]स्थास्ततआपोक्लिमस्थास्तत्रा-

पिबलाधिकस्यप्रथममितिक्रमेणसर्वदुर्बलांतंनेयमितियावत् । तदुक्तमाद्यैः—"प्रतिभंनववर्षाणिकारकाश्रयराशितः । जन्मसंपद्विपत्क्षेमःप्रत्यरिः साधकोवधः ॥ मैत्रंपरममैत्रंचेत्येवमंतर्दशांनयेत् ।" इति । किंच स्वकेन्द्रस्थाद्याग्रहाः नवांशानांनवग्रहदत्तानामब्दानांस्वामिनोभवंतीति । अयमप्यर्थः सूत्रकारसंमत एव । अन्यथासतल्लाभयोरितिसूत्रस्यवैयर्थ्यप्रसंगात् । अब्दानयनंत्वग्रेवदिष्यति ॥ ११ ॥

पितृचतुष्टयवैषम्यबलाश्रयःस्थितः ॥ १२ ॥

केंद्रदशामपरामाह । पितृचतुष्टयेषुलग्नादिकेंद्रेषुवैषम्यबलाश्रयोऽधिकबलयुक्तो राशिःप्रथमदशाप्रदःस्थितःपर्यवसितः । नवांशानामित्यनुवृत्त्याप्रतिराशिनवनवाब्दादशाब्दाग्राह्याः । तथाचकेंद्रपणफरापोक्लिमानांबलाधिकस्यप्रथममितिक्रमेणसर्वदुर्बलांतंदशानेयेति ॥ १२ ॥

सतल्लाभयोरावर्तते ॥ १३ ॥

कारकादिग्रहदशाब्दानयनमाह । सकारकः तल्लाभयोर्लग्नसप्तमयोरावर्तते । अयमाशयः । लग्नात्सप्तमाच्च क्रमोत्क्रमगणनयाकारकपर्यंतराशिसंख्यायत्राधिका साब्दरूपाकारकग्रहदशा, अन्येषांतुग्रहात्कारकपर्यंतंविषमेसमपदानुरोधेनक्रमव्युत्क्रमगणनयासंख्या सा तत्तद्ग्रहाब्दाः,कारकयुक्तग्रहाणांतुकारकाब्दतुल्याएवाब्दाभवंतीति । इयंग्रहदशाद्यैरुक्ता " लग्नात्कारकपर्यंतंसप्तमाद्वादशांनयेत् । उभयोरधिकासंख्याकारकस्यदशाःसमाः ॥ तद्युक्तानांतुतत्तुल्यंप्रत्येकं स्युर्दशाःक्रमात् । ग्रहाः कारकपर्यंतं संख्यान्यस्यदशाभवेत् ॥ कारकस्तद्युतश्चादौतत्केंद्रादिस्थितास्ततः । दशाक्रमेणविज्ञेयाःशुभाशुभफलप्रदाः॥" इति ॥ १३ ॥

स्वामिबलफलानिचप्राग्वत् ॥ १४ ॥

फलमाह । दशास्वामिनांराशीनांग्रहाणांचबलानिफलानिचप्राग्वत् पूर्वोक्तशास्त्रवज्ज्ञेयानीत्यर्थः ॥ १४ ॥

स्थूलादर्शवैषम्याश्रयोमंडूकस्त्रिकूटः ॥ १५ ॥

अथमंडूकदशामाह । मंडूकःमंडूकदशा, त्रिकूटःचरस्थिरद्विस्वभावात्मकत्रिकूटघटितत्वात्केंद्रादित्रिसमुदायघटितत्वाद्वात्रिकूटः, स्थूलादर्शवैषम्याश्रयः लग्नसप्तमयोर्मध्ये योबलवांस्तदाश्रयोभवति । विषमस्यभावोवैषम्यमधिकबलत्वमितियावत् । अयमाशयः । लग्नसप्तमयोर्मध्येबलिनंराशिमारभ्यदशाप्रवृत्तिः तत्रापिपुरुषश्चेज्जातकवान्

तदालग्नसप्तमयोर्बलवतोदशानेया, स्त्रीजातकवतीचेद्बलवत्सप्तमाद्दशानेया । तदुक्तमाद्यैः "बलिनःशुक्रशशिनोर्ज्ञेयामंडूकदादशा । पुरुषश्चेत्ततोनेयास्त्रीचेद्दर्पणतोनयेत् ।" इतिकेंद्रादिक्रमेणमंडूकवत्प्लुत्यापतनान्मंडूकसंज्ञ इत्यर्थः । तस्मादत्रकेंद्रपणफरापोक्लिमक्रमेणतत्रापिबलिनःप्राथम्यमितिरीत्यादशानेयेतियावत् । प्रतिराशिनवाब्दाग्राह्याः ॥ १९ ॥

निर्याणलाभादिशूलदशाफले ॥ १६ ॥

अथफलशूलदशामाह । फलेवक्तव्यशूलदशानिर्याणराशेःसप्तमराशितःप्रवृत्ता भवति । शूलदशेतिनाममात्रनिर्देशः । रुद्रशूलरुद्राश्रयमहेश्वरर्क्षमारकर्क्षादिनिर्याणस्थानंबाहुल्येनशूलदशानेकविधानवाब्दाः अत्र ग्राह्याः ॥ १६ ॥

पुरुषेसमाःसामान्यतः ॥ १७ ॥

विशेषविधानातिरिक्तसकलदशासाधारण्येदशारंभेदशाब्दानयनेचविशेषमाह सर्वासुदशास्वारंभराशौपुरुषेविषमेसति सामान्यतःआरंभलग्नाद्दशाप्रवृत्तिःसामान्यतः समाःअब्दानवनववर्षरूपाग्राह्याः । समेसतितुतत्सप्तमान्नवनवाब्दाग्राह्यास्तस्मादेवदशाप्रवृत्तिर्भवतीत्यर्थःसिद्धएव । तदुक्तंवृद्धैः-"ओजेलग्नंतदेवस्याद्युग्मेतत्सप्तमंभवेत् । दशौजक्रमतोज्ञेयायुग्मेव्युत्क्रमतोमता ॥" इति । किंच पुरुषेजातकवति आरंभराशितोदशाप्रवृत्तिः, स्त्रियां जातकवत्यांतुतत्सप्तमाद्दशाप्रवृत्तिः स्यात् । तदुक्तम "पुरुषश्चेत्ततोनेयास्त्रीचेद्दर्पणतोनयेत् ।" इति ॥ १७ ॥

सिद्धाउडुदाये ॥ १८ ॥

नक्षत्रदशामाह । नक्षत्रायुर्दायेविंशोत्तर्यष्टोत्तर्यादिरूपे समाः अब्दाःसिद्धाःजातकांतरप्रसिद्धाग्राह्या इत्यर्थः ॥ १८ ॥

जगत्तस्थुषोरर्द्धंयोगार्द्धे ॥ १९ ॥

अथ योगार्द्धदशामाह । योगार्द्धदशायांप्रतिराशिसमागतचरदशाब्दस्थिरदशाब्दयोर्योगार्द्धकर्तव्यं तएवयोगार्द्धदशाब्दाः ॥ १९ ॥

स्थूलादर्शवैषम्याश्रयमेतत् ॥ २० ॥

योगार्द्धदशारंभराशिमाह । एतद्योगार्द्धस्थूलादर्शवैषम्याश्रयेलग्नसप्तमयोर्बलवदाश्रयं भवति । अयमर्थः । लग्नेबलवतिलग्नाद्दशाप्रवृत्तिः, सप्तमेबलिनितस्माद्दशा-

प्रवृत्तिर्विषमेक्रमेणसमेव्युत्क्रमेणदशाः प्रवर्तनीया इति । स्त्रीजातकवतीचेद्बलवत्स-प्तमाद्दशानेया, पुरुषोजातकवांश्चेद्बलवतोदशानेयेति । उक्तंचवृद्धैः— " बलिनस्तु दशानेयाराहोर्हिशशिशुक्रयोः । स्त्रीचेद्दर्पणतोनेयापुरुषश्चेत्ततोनयेत्॥" इति॥२०॥

कुजादिस्त्रिकूटपदक्रमेणदृग्दशा ॥ २१ ॥

अथ दृग्दशामाह । कुजादिर्लग्ननवमादित्रिकूटपदक्रमेणदृग्दशाभवति । आदौ नवमस्यततोदृष्टिचक्रेसंमुखराशेःततःकुत्रचित्क्रमरीत्याकुत्रचिद्व्युत्क्रमरीत्यापंचम-स्यततःकुत्रचित्क्रमेण कुत्रचिद्व्युत्क्रमेणैकादशस्यसम्मुखराशेरित्युक्तम् । तत्रप्रमा-णाभावात्पंचमस्यादौकुतो न । उच्यते । दृष्टिविषये आदौअभिपश्यंत्यृक्षाणि ततः पार्श्वभेचेतिसूत्रस्वारस्यादेवत्रिकूटपदंत्रिराश्यात्मकंपदंततो दशमस्यततएकादशस्यदृ-ग्दशाभवतिनवमदृग्दशादशमदृग्दशाएकादशदृग्दशेतिफलितार्थः ॥ २१ ॥

मातृधर्मयोःसामान्यंविपरीतमोजकूटयोः ॥ २२ ॥

अथौजयुग्मपदभेदेनगणनाक्रममुपदिशति । स्पष्टम् ॥ २२ ॥

यथासामान्यंयुग्मे ॥ २३ ॥

मातृधर्मयोःपंचमैकादशयोर्गणनायांसामान्यंनकचिदित्यात्मकंसामान्यं सामन्य-शास्त्रमोजकूटयोः ओजपदयोर्विपरीतंयुग्मेयुग्मपदयोर्यथासामान्यं सामान्यमनति-क्रम्यविज्ञेयम् । तथाचक्रमाद्वृषेवृश्चिकेचेत्यत्रवृषवृश्चिकयोरोजकूटस्थत्वाद्व्युत्क्रमेण पंचमकादशौदृग्योग्यौ सिंहकुंभयोर्युग्मकूटस्थत्वाद्यथासामान्यंव्युत्क्रमेणैवपंचमैकाद-शौदृग्योग्यौभवतः द्विस्वभावे दृग्योग्यपंचमैकादशयोरभावात् दृष्टिचक्रेयत्रयत्रदृष्टिस्त-त्रादौनवमदशानंतरंसप्तमस्यततोनवमादित्रिकेद्विस्वभावराशिदृग्दशायांपार्श्वराशिद्वय-दशा, क्रमस्तुपुंराशिश्चेद्द्विस्वभावस्तर्हिक्रमेणस्त्रीराशिश्चेद्व्युत्क्रमेण चतुर्थदशमौग्राह्यौ अयं भावः । चरराशिषुक्रमेणपंचमैकादशौस्थिरराशिषुव्युत्क्रमेणपंचमैकादशौदृग्यो-ग्यौभवतस्तथैवपार्श्वराशिदशाक्रमोज्ञेयः,द्विस्वभावराशिषु आदौनवमस्य ततः सप्तम-स्य ततोविषमश्चेद्द्विस्वभावस्तर्हिक्रमेणचतुर्थस्यसमश्चेत्तदाव्युत्क्रमेणचतुर्थस्यततस्तथै-वदशमस्येतिअत्रनवनवाब्दाग्राह्याः ॥ २३ ॥

पितृमातृधर्मप्राण्यादिस्त्रिकोणे ॥ २४ ॥

अथत्रिकोणदशामनुपदिशति । लग्नपंचमनवमेष्वेषोराशिर्बलवांस्ततस्त्रिकोणदशा-

रंभः आरंभराशिमारभ्यक्रमोत्क्रमाभ्यांद्वादशराशीनांदशाज्ञेयाः । एतदुक्तंवृद्धैः— "लग्नत्रिकोणयोराशिर्बलवानुक्तहेतुभिः । तदारभ्योन्नयेच्छ्रीमंश्चरपर्यायवद्दशा ॥ युग्मराशिभुवांपुंसामोजंगृह्णीतसम्मुखे । ओजराशिभुवांस्त्रीणांयुग्मंगृह्णीतसंमुखम् ॥ ओजराशिभुवांपुंसांगृह्णीयादोजमेवतु । युग्मराशिभुवांस्त्रीणांयुग्ममेवसमाश्रयेत ॥ क्रमोत्क्रमाभ्यांगणयेदोजयुग्मेषुराशिषु ।" इतिकथनात्पुरुषे जातकवतिक्रमात्स्त्रियां जातकवत्यांतुव्युत्क्रमादित्यर्थः संपन्नः । चरपर्यायवद्दशामितिकथनान्नाथांताःसमा इतिरीत्यावर्षाण्यत्रग्राह्याणीत्यर्थः ॥ २४ ॥

तत्रबाह्याभ्यांतद्वत् ॥ २५ ॥

पाकभोगराशीदर्शयन्फलमतिदिशति । तत्तत्त्रिकोणदशायांद्वारबाह्यराशिभ्यांतद्वत्पूर्वोक्तवत्फलंज्ञेयमित्यर्थः । तदुक्तमाद्यैः- " तदिदंचरपर्यायस्थिरपर्याययोर्द्वयोः । त्रिकोणाख्यदशायांचपाकभोगप्रकल्पने ॥ पाकेभोगेचपापाढये देहपीडामनोऽन्यथा ।" इति तत्तत्कारकेभ्यस्तत्तत्स्थानफलमाह ॥ २५ ॥

घासगैरिकात्पत्नीकरात्कारकैःफलादेशः ॥ २६ ॥

तत्तत्कारकेभ्योघासगैरिकात्पत्नीकरात् सप्तमतृतीयप्रथमनवमेभ्योयथायोगंतत्तत्कारकैः फलादेशः कर्तव्यः । अयंभावः । सप्तमात्स्त्रीविचारः तृतीयात्कनिष्ठभ्रातुः कारकात्स्वस्यनवमात्पितुर्धर्मस्यविचारः कार्य इत्यर्थः ॥ २६ ॥

ताराकांशेमंदाद्योदशशः ॥ २७ ॥

नक्षत्रदशामाह । जन्मदिनेयच्चंद्रस्यनक्षत्रंतदीयाःसर्वर्क्षरीत्यायाघटिकास्ताद्वादशधाविभज्यप्रथमखंडमारभ्य द्वादशसुखंडेषुलग्नादिद्वादशराशयः क्रमेणगणनीयाः । यस्मिन्घटिकामयेखंडेजन्मसखंडःभादितआरभ्यगणनयाजन्मलग्नादितोयद्राशिविशिष्टस्तंराशिमारभ्यक्रमव्युत्क्रमभेदेनद्वादशराशीनांदशा आनेया इत्यर्थः । अत्रप्रतिराशिनवाब्दाग्राह्याः । सर्वंस्पष्टम् ॥ २७ ॥

तस्मिन्नुच्चेनीचेवाश्रीमंतः ॥ २८ ॥ स्वमित्रभे किंचित् ॥ २९ ॥ दुर्गतोऽपरथा ॥ ३० ॥

गुणविशेषतः फलंदर्शयति सूत्रैः । तस्मिंस्ताराल्ग्नेउच्चेनीचेवाराशौ सतिजातानराःश्रीमंतोभवंति, ताराल्ग्नेस्वमित्रराशौसतिकिंचिल्लक्ष्मीवंताभवंति । अप-

रथा शत्रुराशौसतिदुर्गतो दरिद्रोभवतीत्यर्थः । तदुक्तमाद्यैः— " जन्मतारेद्वादशधा विभक्तेयत्रचंद्रमाः । लग्नात्तावत्तिथेराशौन्यसेदाद्यदशाधिपम् ॥ सयद्युच्चेथवानीचे तदास्याद्राजसेवकः । स्वमित्रर्क्षेसुखीशत्रुराशौनिःस्वःसमेसमः ॥" इति ॥ २८ ॥ ॥ २९ ॥ ३० ॥

स्ववैषम्येयथास्वंक्रमव्युत्क्रमौ ॥ ३१ ॥ साम्ये विपरीतम् ॥ ३२ ॥ शनौचेत्येके ॥ ३३ ॥ अंतर्भुक्त्यंशयोरेतत् ॥ ३४ ॥

अथांतर्दशोपदशयोः संचारविशेषमाहसूत्रैः । स्वस्यात्मकारकस्यवैषम्येओजपदत्वे यथास्वंयथाराशिस्वभावंक्रमव्युत्क्रमौज्ञेयौ । ओजपदेओजराशिश्चेत्क्रमः युग्मराशिश्चेद् व्युत्क्रमइति।साम्येयुग्मपदत्वेविपरीतंयुग्मराशौक्रमः ओजराशौव्युत्क्रम इतिज्ञेयम् । कारकेयथाओजयुग्मपदभेदेनक्रमव्युत्क्रमतद्विपरीतत्वंतथाशनावपिवेदितव्यानीत्येके आचार्यावदंति । स्वपदोपादानात्कारकांतर्दशायामुपदशायांचैवेदंबोध्यम् ॥ ३१॥ ॥ ३२ ॥ ३३ ॥ ३४ ॥

शुभादशाशुभयुतेधाम्न्युच्चेवा ॥ ३५ ॥

अथ दशाफलविशेषमाह । शुभयुतेधाम्निराशौसतितद्राशिदशाशुभास्यात् उच्चग्रहयुतेराशौतदधिपेउच्चेवातद्राशिदशाशुभेत्यर्थः ॥ ३५ ॥

अन्यथान्यथा ॥ ३६ ॥

उच्चमित्रशुभयोगलक्षणगुणाभावेसमनीचादियोगसत्वेऽशुभेत्यर्थः ॥ ३६ ॥

सिद्धमन्यत् ॥ ३७ ॥

अन्यत्प्रकृतंग्रंथानुक्तंसिद्धंशास्त्रांतरप्रसिद्धंग्राह्यमित्यर्थः ॥ ३७ ॥

इति द्वितीयाध्यायस्यचतुर्थःपादः ॥ ४ ॥

इतिश्रीनीलकंठज्योतिर्विद्विरचितायांजैमिनीयसूत्रव्याख्ययांसुबोधिन्यां

द्वितीयाध्यायस्यचतुर्थःपादःसमाप्तिमगात् ॥ ४ ॥

इति द्वितीयाध्यायः ॥ २ ॥

श्रीः ।

अथ तृतीयोऽध्यायः ३.

अथराजजनिताभ्यांयोगेयोगेलेयान्मेषाधिपः ॥ १ ॥ उच्चनीचस्वांशवतीतादृशदृष्टिश्चशुभमात्रदृष्टेयदिमहाराजः ॥ २ ॥ लेयलाभयोः परकाले ॥ ३ ॥ लाभलेयाभ्यांस्थानगः ॥ ४ ॥ तत्रशुक्रचंद्रयोर्यानवंतः ॥ ५ ॥ तत्रशनिकेतुभ्यांगजतुरगाधीशः ॥ ६ ॥ शुक्रकुजकेतुषुस्वभाग्यदारेषु स्थितेषुराजानः ॥ ७ ॥ पितृलाभधनप्राणयोश्च ॥ ८ ॥ पत्नीलाभयोःसमानकालः ॥ ९ ॥ भाग्यदारयोर्ग्रहयुक्तसमानेषुसांप्रतः ॥ १० ॥ तत्रउच्चेकरसंख्या राज्ञांच ॥ ११ ॥ पितृधर्मयोर्लेयलाभयोर्गुरौचंद्रशुभदृग्योगेमंडलांतः ॥१२॥ तत्रबुधगुरुदृग्योगेयुवराजोवा॥१३॥ तस्मिन्नुच्चेनीचेपितृलाभयोःश्रीमंतः ॥ १४ ॥ स्वभावनाथाभ्यांशुक्रचंद्रदृग्योगयोः ॥ १५ ॥ तत्रशुभवर्गेषुश्रीमंतः ॥ १६ ॥ दारशूलयोश्चंद्रगुरौ ॥ १७ ॥ शूलेचंद्रेरिःफगुरौधनेषुशुभेषुराजानः ॥ १८ ॥ पत्नीलाभयोश्च ॥ १९ ॥ एवमंशतोदृक्काणतश्च ॥ २० ॥ लेयलाभश्चंद्रेगुरौशुभदृग्योगेमहांतः ॥२१॥ लाभचंद्रेऽपि ॥ २२ ॥ पापयोगाभावे शुभदृग्योगिनिचं ॥ २३ ॥ अत्रशुभदृग्योगेराजप्रेष्यः ॥ ॥ २४ ॥ शुभवर्जेषुत्रिकोणकेंद्रेवा ॥ २५ ॥ स्वांशयोगेराजवंशः ॥ २६ ॥ उच्चांशेतादृशदृष्टिश्चराजाराजवंश्योवा ॥ २७ ॥ अशुभदृग्योगान्नचेन्नचेन्न ॥ २८ ॥ पंचमांशपदेपिसमेषु शुभेषुराजानोवा ॥ २९ ॥ स्वलेयमेषाभ्यांराज-

चिह्नानि ॥ ३० ॥ इत्युपदेशसूत्रेतृतीयेप्रथमःपादः ॥ १ ॥ यज्ञजनेशाभ्यांस्वकारकाभ्यांनिधनम् ॥ १ ॥ निधनंलेयलाभयोःप्राणि ॥ २ ॥ गुरौकेंद्रेमंदाराभ्यांदृष्टेशनिभोगहेतौकक्ष्यापवादः ॥ ३ ॥ रिपुरोगयोश्चंद्रे ॥ ४ ॥ स्वभावगेश्च ॥ ५ ॥ रोगतुंगयोर्वा ॥ ६ ॥ तत्रशनौप्रथमम् ॥७॥ राहौद्वितीयम् ॥८॥ केतोस्तृतीयंनिधनम् ॥९॥ तत्तुत्रिकोणेषु ॥१०॥ चरेप्रथमम् ॥११॥ स्थिरेमध्यमम् ॥१२॥ द्वंद्वेन्त्यम् ॥१३॥ एवंचरस्थिरद्वंद्वचराभ्याम् ॥१४॥ स्वपितृचन्द्राः ॥ १५ ॥ तत्रशनिकक्ष्याह्रासः ॥१६॥ रिपुषष्ठाष्टमयोश्च ॥१७॥ प्रथममध्यमयोरंत्यमध्यमयोर्वा ॥१८॥ शुभदृग्योगान्न ॥१९॥ पितृलाभेशयोरस्यैवयोगेवा ॥ २० ॥ अप्रसंगवादात्प्रामाण्यं रोगयोःप्राणिसौरदृष्टियोगाभ्याम् ॥२१॥ द्वारबाह्ययोरपवादः ॥ २२ ॥ द्वारेचन्द्रदृग्योगान्न ॥ २३ ॥ केवलशुभसंबंधेबाह्येच ॥ २४ ॥ लेयरोगक्रूराश्रयेपि ॥ २५ ॥ रोगर्क्षत्रिकोणदशाब्दे ॥ २६ ॥ रोगनवांशदशाभ्यांनिधनम् ॥ ॥ २७ ॥ तत्रापिशनियोगे ॥ २८ ॥ मिश्रेशुभयोगान्न ॥ ॥ २९ ॥ लग्नेंद्वोर्भावेस्वलाभयोर्भावयोः क्रूरेरुद्राश्रयेपि ॥ ॥ ३० ॥ नवापवादानि ॥ ३१ ॥ इनशुक्राभ्यांरोगयोः प्रामाण्यंनिधनम् ॥ ३२ ॥ महेश्वरब्रह्मयोराद्यन्तयोः ॥ ॥ ३३ ॥ चरनवांशदशायांनिधनम् ॥ ३४ ॥ चित्तनाथाभ्यांरिपुरोगचित्तकर्मणि ॥ ३५ ॥ क्रूरग्रहेषुसद्योरिष्टम् ॥ ॥ ३६ ॥ शनिराहुचन्द्रयोगेसद्योरिष्टम् ॥ ३७ ॥ कोणाश्रयेषुसद्योरिष्टम् ॥ ३८ ॥ सर्वमेवंपापग्रहेषुच ॥ ३९ ॥

केवलरिपुरोगाचित्तनाथाभ्याम् ॥४०॥ तत्रापिचित्तनाथापहारे ॥ ४१ ॥ इत्युपदेशसूत्रेतृतीयेद्वितीयःपादः ॥ २ ॥ लेयलाभयोःपदम् ॥ १ ॥ पदभावयोश्चरे ॥ २ ॥ क्रांतराशौकर्मणिदुष्टंमरणंकर्मणिपापेराजभ्यांयथासनुधे ॥ ३ ॥ दिनेदिनौपुण्यम् ॥ ४ ॥ तत्रकर्मादि ॥ ५ ॥ तत्रकर्मादि ॥ ६ ॥ चराचरयोर्विपरीतकाले ॥ ७ ॥ ततःकोशे ॥ ॥८॥पत्नीदृष्टमात्रगुरुयुक्ते॥९॥पापदृग्योगे ॥१०॥ पाषाणमरणे ॥११॥ अत्रकेतुयुक्त ॥१२॥ दोषेणहननम् ॥ १३ ॥ केतौपापदृष्टौवा ॥१४॥ अत्रशुभयोगे ॥ १५ ॥ मलिनभावेक्रांतराशौकर्मणिदुष्टंमरणम् ॥१६॥ क्रूराश्रयेसर्वशूलादि ॥ १७ ॥ राहुदृष्टौनिश्चयेन ॥ १८ ॥ राहुशनिभ्यांदुष्टबलादि ॥ १९ ॥ तत्रप्रतिबंधः ॥ २० ॥ कुजकेतुभ्यांनित्यं च ॥ २१ ॥ वाशीयोग्यफूलदें (?) ॥ २२ ॥ मृत्युरोगाभ्यांराहुचन्द्राभ्यांयथास्वंमृत्युः ॥ २३ ॥ अत्रभावकरादि ॥ २४ ॥ तुरगवृषवर्गे ॥ २५ ॥ अत्रकुजास्फोटकादिकुंडलधरश्च ॥ २६ ॥ रत्नाकरयोगे ॥ २७ ॥ कालदंडान्मरणम् ॥ २८ ॥ शेषाभुजंगादि ॥ २९ ॥ कीटवृषवृश्चिकांशे ॥ ३० ॥ रोगमातृदृष्टयोर्भावेमूषकादिमृतिः ॥ ३१ ॥ तत्रमंदे ॥ ३२ ॥ विषपानादि ॥ ३३॥ सौम्यदृग्योगाभ्यां मंडूकभेदादि ॥ ३४ ॥ स्वांशग्राह्याद्वर्णनामभिः ॥ ३५ ॥ लेयान्मृत्युः ॥ ३६ ॥ चलेमृत्युः ॥ ३७ ॥ भाग्येदंडात् ॥ ॥ ३८ ॥ कर्माविषमक्षात् ॥ ३९ ॥ दारज्वरभयम् ॥४०॥

माताशत्रुहतः ॥ ४१ ॥ शनौरिपुभयम् ॥ ४२ ॥ लाभेकुष्ठ-रोगः ॥ ४३ ॥ विषूचीजलरोगादिदेहे ॥ ४४ ॥ धनेखड्गा-दौ ॥४५॥ निरयदुर्मरणम् ॥ ४६ ॥ तत्ररवियोगेरिपुशस्त्रा-ग्निभयम् ॥४७॥ चंद्रेणकूपे ॥ ४८ ॥ कुजेनव्रणस्फोटादि ॥४९॥ बुधेनवृक्षपर्वतादयः ॥ ५० ॥ गुरुणास्ववैषम्येरौ-पावकः ॥५१॥ शुक्रेणशुक्रमेहात् ॥ ५२ ॥ शनिनाविषभ-क्षणादि ॥५३॥ राहुकेतुभ्यांविषसर्पलोष्टबंधनादिभिः ५४॥ शनिराहुभ्यांराहुणादंडादि ॥ ५५ ॥ तत्रगुरुराहुभ्यामभि-चारादि ॥५६॥ तत्रगुरुशनिभ्यांदृष्टेयथास्वनाशः ॥ ५७ ॥ स्वत्रिंशांशेकौलकाफलरोगादि ॥ ५८ ॥ ललाटंप्रथमम् ॥५९॥ केशंद्वितीयः ॥ ६० ॥ बधिरंतृतीयः ॥६१॥ चतुर्थौ नेत्रे ॥ ६२ ॥ सिंहादौपंचमे ॥ ६३ ॥ षष्ठंजिह्वाग्रे ॥ ६४ ॥ पूर्वषट्केराहुकेतुभ्यांस्वजिह्वादि ॥ ६५ ॥ तत्रशनिमांदिभ्यां गलद्वादि ॥ ६६ ॥ तत्रकुजेशोषः ॥ ६७ ॥ लाभांशेमर-णम् ॥ ६८ ॥ तत्ररवौप्रातिबंधः ॥६९॥ कौंतायुधधनौरोगे ॥ ७० ॥ सायकैर्धनम् ॥ ७१ ॥ अशनिहतकाये ॥ ७२ ॥ मार्गेमार्गेरिपूणांवैरिवर्गश्चस्ववैषम्येरिपुः ॥ ७३ ॥ क्रूराश्र-यबलेरिपुहतः ॥७४॥ शन्यारफणिवर्गाद्यैः ॥ ७५ ॥ भा-वेशाक्रांतराशिस्थः ॥ ७६ ॥ रवियुक्तदृष्टेप्राथमिकः ॥७७॥ तत्रचन्द्राग्निश्चयेनाकुजेनज्ञातिभ्यः ॥ ७८ ॥ तत्रशनौ-मृत्युवादाग्निकरणश्च ॥७९॥ स्वांशेपि ॥ ८० ॥ अन्यतरां-शश्च॥८१॥ नीचाश्रयेविपरीतम् ॥८२॥ तत्रशनौरूपे ॥८३॥

विषभक्षणादि ॥ ८४ ॥ तनुतनौदंडहरम् ॥ ८५ ॥ तत्र भावविशेषः ॥८६॥ (?) अघशवनिधनम् ॥८७॥ मातापित्रोर्द्वितीयः ॥ ८८ ॥ ज्ञातिवर्गभ्रात्रादिस्तृतीयः ॥८९॥ कलत्रंचतुर्थम् ॥ ९० ॥ पुत्रंपंचमम् ॥९१॥ शत्रुवर्गंषष्ठम् ॥ ९२ ॥ तत्रपापानांसन्निकृष्टम् ॥ ९३ ॥ जनने ॥ ९४ ॥ लाभेस्त्रियाविपत्तिः ॥ ९५ ॥ भावेस्वकर्मचित्तांशात्स्वांशे निधनेनिधनम् ॥ ९६ ॥ स्वभूच्चात्पतम् ॥ ९७ ॥ शूले मृतिः ॥ ९८ ॥ धनेनज्ञानवन्मरणम् ॥ ९९ ॥ नयने ग्रहणीरोगादि ॥ १०० ॥ शूलेशत्रुमरणम् ॥ १०१ ॥ उच्चेग्रहभातिः ॥ २ ॥ तत्ररविशनिभ्यामोजेकूटराशौ युग्मेनिर्णयः ॥ ३ ॥ धनमुखाभ्यांपादरोगः ॥ ४ ॥ तनुविक्रमाभ्यासंगुलिरोगः ॥ ५ ॥ तत्रकेतुनाअंगहीनश्च ॥ ॥ ६ ॥ तत्रपापदृष्टेपादहीनः ॥ ७ ॥ अथबलानि ॥ ८ ॥ प्राणिनिशुभयुक्ते ॥ ९ ॥ राशिबलभागे ॥ ११० ॥ चरपर्यायेन ॥ ११ ॥ शुभदृष्टेपादहीनः ॥ १२ ॥ शुभदृष्टित्रिशूले ॥ १३ ॥ अंशात्रिशूलेवा ॥ १४ ॥ भावकोणाभ्यांनिसर्गतः ॥ १५ ॥ आश्रयतोबलिष्ठः ॥ १६ ॥ यादिर्भराशौपितृलाभयोः ॥१७॥ स्वकर्मभेदेन ॥ १८ ॥ मूर्तित्वेपरिपाताभ्यांजघन्यायुषितत्रपरिपाके ॥ १९ ॥ एवंनिधनंमातापित्रोः ॥१२०॥ भूम्यंशश्चानिवृत्तिकारकः ॥२१॥ नायांतसंज्ञाःस्युः ॥ २२ ॥ कर्मस्थाचरपर्याये ॥ २३ ॥ भाग्यदारयोःस्थिरोभयोः ॥ २४ ॥ भाग्यकारकाभ्यांमंगलपदम् ॥ ॥ २५ ॥ मृत्युमृत्युषि ॥ २६ ॥ अन्यैरन्यथा ॥ २७ ॥

भूतमन्यत् ॥ १२८ ॥ इत्युपदेशेआयुर्दायापवादेतृतीये तृतीयःपादः ॥ ३ ॥ पुनःपदःपदे ॥ १ ॥ उपग्रहयुक्तेश्रीमंतः ॥ २ ॥ आधानपितुर्लेयमेषम् ॥ ३ ॥ सूर्यात्कर्मणि पित्रोः ॥ ४ ॥ पुनः पदउत्तरयोः ॥ ५ ॥ पदाभ्यांभृगुसौम्यव्यतिरिक्ते ॥ ६ ॥ दिनकरेलाभेयोरेनिसंज्ञाःस्युः (?) ॥ ७ ॥ प्रियानुपपत्तिः ॥ ८ ॥ तत्रपाकर्स ॥ ९ ॥ स्वकर्मव्याघ्रश्च ॥ १० ॥ दिनकरत्रिकोणेलाभपदेगर्भसंप्लवे ॥११॥ तत्रगर्भपाते ॥ १२ ॥ रविकेस्वंशेशुक्रशोणितौ ॥ १३ ॥ गुरुत्रिंशांशे ॥ १४ ॥ चन्द्रदृग्योगे ॥ १५ ॥ सुकलिषुवयोः ॥ १६ ॥ शुक्रेतौ ॥ १७ ॥ वर्णपरिपाकम् ॥ १८ ॥ यस्याधानंचन्द्रदृग्योगे ॥ १९ ॥ यथाआधानपरिपाकेचचंद्रबुधभृगुयोगाभ्यामाधानपरिमितेः ॥ २० ॥ सुवर्णारणिसंयोगे ॥२१॥ शनिचंद्राभ्यांनाभेरधः ॥२२॥ गर्भवायुपरिवृन्ते ॥ २३ ॥ तत्रकेतुनापुष्करस्रजारव्यादिकेत्वंतम् ॥२४॥ ग्रहानातिरेतः ॥२५॥ अन्ययोनिगर्भेष्वजः ॥२६॥ राहुचंद्राभ्यांवीरतमः ॥२७॥ अवीरोपपत्तिःकर्मणिपाकेएवंगर्भनिर्णयम्॥२८॥स्थानाद्यैःस्वांशगश्च॥२९॥यथाधर्मशीले ३०॥ स्वांशग्रहैर्नीचउच्चयोः ॥ ३१ ॥ क्रियमेषलग्नेषु ॥ ३२ ॥ अथरविप्राणाः ॥ ३३ ॥ नैसर्गिकबलेष्वाभियोगशूलइहजायते ॥३४॥ पुंपुमान् ॥ ३५ ॥ बाणइति ॥३६॥ अत्रोदाहारः ॥ ३७ ॥ केतुशनिभ्यांरक्तप्रदरः ॥ ३८ ॥ शनौ पातयोमेष्टत्यवर्णः ॥ ३९ ॥ शनिशुक्राभ्यांश्यामवर्णः

॥ ४० ॥ गुरुशशिभ्यांगौरवर्णः ॥ ४१ ॥ शनिबुधाभ्यां-नीलवर्णः ॥ ४२ ॥ शनिकुजाभ्यांरक्तसुवर्णः ॥ ४३ ॥ शनिचन्द्रभ्यांश्वेतवर्णः ॥ ४४ ॥ स्वांशवशाद्गौरनीला-दीनि ॥४५॥ तथाप्युदाहरंति ॥ ४६ ॥ रेतःसिंचन्प्रजाः प्रजनयामितिविज्ञायते ॥ ४७ ॥ चरेपापदृग्योगेपुत्रनाशः ॥ ४८ ॥ शुक्रदृग्योगेपुत्रलाभः ॥४९॥ पापशुभदृग्योगा-भ्यांप्रथमवर्णक्रमेणह्रासावृत्तिः ॥ ५० ॥ यन्नवभागेनवां-शाभ्यांसंख्यावृद्धिः ॥ ५१ ॥ बीजयुगबलयोर्बिंदुपतनका-लेयमलाभ्यामूर्ध्वतःशुभपापयोश्चरस्थिरयोरंधं तोतादिक-नेत्रविकृतोष्ठनासिकमुखकर्णकेशदंतपटलपादांगहीनकु-ब्जबधिरमूलांगोपांगसुशिरकेशावर्तचक्रबीजाविपर्यासकु-नखीवृषोन्नतबृहन्नाभिनेत्रःपार्श्वदृष्ट्योरंधकुब्जवामनस-त्वस्वरनीचस्वरहीनस्वरेत्यादिष्वपिपितृमात्रोर्बलानि ॥ ॥ ५२ ॥ एषामृक्षाणांबलानि ॥ ५३ ॥ स्वपितृभाग्ययो परिपाककाले ॥ ५४ ॥ इतितृतीयाध्यायेगर्भवर्णनिर्णयो-नामचतुर्थःपादः ॥ ४ ॥ समाप्तश्चाध्यायः ॥ ३ ॥

अथचतुर्थोऽध्यायः ४.

पितृदिनेशयोः प्राणीदेहः ॥१॥ लाभचंद्रयोः प्राणीहृदयम् ॥ २ ॥ लेयचंद्रयोः प्राणीशिरः ॥ ३ ॥ भाग्यचंद्रयोःप्रा-णीसुखम् ॥ ४ ॥ कामचंद्रयोः प्राणीकंठः ॥ ५ ॥ दारचं-द्रयोः प्राणीबाहुः ॥ ६ ॥ मातृचंद्रयोः प्राण्युदरम् ॥ ७ ॥ ततश्चंद्रयोःप्राणीजघनम् ॥८॥ लाभचंद्रयोःप्राणीपृष्ठः॥९॥

दिनचंद्रयोः प्राणीगुदः ॥१०॥ धनचन्द्रयोः प्राणीपादौ ॥११॥ रिःफचंद्रयोः प्राणीनेत्रे ॥ १२ ॥ शूलचंद्रयोःकर्णयोःप्राणी कर्णौ ॥१३॥ रौप्यचंद्रयोःप्राणीनासिके ॥१४॥ एवंद्वादश-भावानाम् ॥१५॥ प्राणिबलानि ॥ १६ ॥ अप्राण्यपिपापदृष्टः ॥ १७ ॥ प्राणिनिशुभदृष्टे ॥१८॥ तत्तद्भावेजन्मसूचितम् ॥ १९ ॥ आजन्मादिर्वपुःषु ॥२०॥ पित्रोःप्राक्काले ॥ २१ ॥ शरमेवमातापितरौजनयतः ॥२२॥ अशोणितोक्लीवश्च२३ एवंभावविचारः ॥२४॥ अंकशाभ्यांतु ॥२५॥ वर्णभेदाश्रये-ण ॥२६॥ जीवेंदुबुधादयः ॥२७॥ ब्राह्मणश्चरविःकुजःक्षत्त्रः ॥२८॥ शनिःशूद्रश्च ॥२९॥ राहुर्दूरजातिः॥ ३० ॥ केतुश्चां-डालः ॥३१॥ वर्णभेदेनपुत्रलाभाभ्यांमृगवर्णां ॥३२॥ आसुर-त्रयंच ॥३३॥ यदिपापबाहुल्यंतत्ररमणीजालः३४ सुखकेशा-नि ॥३५॥ षडानि ॥३६॥ शनिराहुकेतुजेषुवैपरीत्यम् ॥३७॥ तालुतेफोफस्यशेवलेमित्रावरुणबले (?) ॥ ३८ ॥ मृत्युना कैवल्यम् ॥३९॥ शृंगारेलाटः ॥ ४० ॥ प्राणपाणौबले ॥४१॥ मृत्युविचित्ते ॥४२॥ माधुरीकन्ये ॥४३॥ मांजिष्ठेमृगे ४४॥ मानुषिकुरूपः ॥४५॥ मरणेमाने ॥४६॥ मायामालिंगे ॥४७॥ शुभेनकर्मणिपितृनियोजयोजयेत् ॥ ४८ ॥ पापेमातारेमि-श्रेभ्रातरः ॥४९॥ शुभपापमिश्रेविरूपः ॥ ५० ॥ मातुनाशो कः ॥ ५१ ॥ चंद्रागुदृग्योगान्निश्चयेनास्वमूर्तिपुरुषेकालरू पः ॥५२॥ तिर्यग्दृष्टौप्रायोनिर्वृत्तिकारकः ॥ ५३ ॥ शूलेश-योदीरयेशतोयंगुरुदृष्टेच ॥ ५४ ॥ इतिउपदेशेचतुर्थेप्रथमः

पादः ॥१॥ बलपदयोः प्राणीमारकः ॥१॥ रुद्राश्रयेपि ॥२॥ भावेपिबलदृष्टांतः ॥३॥ ओजयुग्मयोः प्राणिबलम् ॥ ४ ॥ अभिपश्यतिभावानि ॥ ५ ॥ शुभान्यतराणिच ॥ ६ ॥ प्रत्यक्शूलेनित्यविक्रमेबुधशुक्राभ्यांदंतोष्ठपटलपार्श्वपाः ७ करकर्णाभ्यांमृत्युचित्तयोर्विपरीतम् ॥ ८ ॥ लग्नेपित्रकभावेपिकामनाथयोरैक्येयमलः ॥ ९ ॥ कामनाथप्राणिनिशुभम् ॥ १० ॥ स्वनाथप्राणिनिच्युतयोः ॥११॥ भावयोःप्राणिनिकक्ष्याह्रासः ॥ १२ ॥ शुभयोगबलाच्चैवम् ॥ १३ ॥ मिश्रसमाः प्राणिहीनेविपरीतम् ॥१४॥ समेनित्यम् ॥१५॥ भाग्ययोर्बलम् ॥ १६ ॥ गुरुचन्द्रयोर्धर्मधनैक्येकर्मबले ॥ १७ ॥ मेषेविपरीतम् ॥१८॥ ततःप्राणाःस्वपितृयोगः १९ शुद्धस्वकाले ॥२०॥ अनुकूललेयेतुंगेनीचे ॥ २१ ॥ भावबलाभ्यांतु ॥२२॥ केंद्रत्रिकोणोपचयेषुराहुकुजौजानुहावीरिकेवलराहौतत्रनिधनम् ॥२३॥ भौमदृग्योगान्निश्चयेन ॥ २४ ॥ तत्रशनौगुरुदृग्योगेसेतुयोग्यं स्वत्रिकोणराशिषु ॥२५॥ पदेचापदभावेस्वामिनइत्थम् ॥२६॥ ह्रस्वफलादिशुभवर्गयुतिशेषास्त्वन्ये ॥२७॥ मूर्तिरूपंच॥२८॥ स्वकारकव्यतिरिक्तेषु ॥२९॥ भात्रबलेचंद्राश्रयेपि ॥ ३० ॥ दारेमित्रस्वपितृभ्याम् ॥३१॥ भावशूलदृष्ट्याच ॥३२॥ पितृनाथदृष्ट्यारोगः ॥ ३३ ॥ पुत्रनाथदृष्ट्यादरिद्राः ॥ ३४ ॥ शूलनाथदृष्ट्याव्ययशीलः॥३५॥रिपुनाथदृष्ट्याकर्म ॥३६॥ धननाथदृष्ट्यामिरोगीचा॥३७॥ माननाथदृष्ट्याप्रबलः ३८॥

दारेशदृष्ट्यासुखिनः ॥३९॥ कामेशदृष्ट्याप्रध्वंसः ॥ ४० ॥ भाग्यनाथदृष्ट्यासुरूपः ॥४१॥ सर्वदृष्ट्याप्रबलः ॥ ४२ ॥ दारभाग्येच ॥ ४३ ॥ वर्णपदाश्रयकोणेषु॥४४॥शुक्रेच ४५ कोणयोःशुभेषुमित्रप्रागपवर्गे ॥ ४६ ॥ केंद्रत्रिकोणयोःशुभेकालबलानि॥ ४७ ॥ इत्युपदेशसूत्रेचतुर्थेध्यायेद्वितीयः पादः॥२॥बुधशुक्रयोर्युग्मेस्त्रीजननम्॥१॥ कालनिर्णयादि ॥२॥ अंशभेदेनलिप्तविलिप्ताः ॥३॥ कालकाः ॥४॥ अनुलिप्ताश्च ॥ ५ ॥ द्विनाद्विचतुःसंख्यादि ॥६॥ नवभागशेषे ॥ ७ ॥ आद्यंशके ॥ ८ ॥ ग्रहक्रमेणवर्णम् ॥ ९ ॥ पुमान्पुंग्रजः ॥ १० ॥ अन्येस्त्रियः ॥ ११ ॥ क्लीबेपूर्वापरौ ॥ १२ ॥ एवंवर्णसंज्ञाःस्युः ॥ १३ ॥ नीचेदारांशकः ॥ १४ ॥ आद्यादिस्ववर्णः ॥ १५ ॥ मित्रभेदाभ्यांचरपर्यायेणसंज्ञाःस्युः ॥ १६ ॥ धात्वादिरूपवर्णेन ॥ १७ ॥ स्वांशगैश्चबलः १८॥ रविकुजौरक्तौ ॥ १९ ॥ बुधशुक्रौश्यामौ ॥२०॥ कृष्णेतराः स्युः ॥ २१ ॥ त्रित्रिभागेचरस्थिरोभयपर्याये ॥ २२ ॥ घटिकाषष्टिनिर्णये ॥ २३ ॥ अंशस्यैकस्यपंचघटिकाः॥२४॥ एवंद्वादशपंचस्युः विघटिकादिक्रमेण॥२५॥ओजेपुरुषः २६ युग्मेस्त्रियः ॥ २७॥ ओजयुग्मयोःस्त्रीपुरुषौ ॥ २८ ॥ यथामातरिवर्णे ॥ २९ ॥ मात्राप्रसवकालमुखेन ॥३०॥ राह्विंदुभ्यांस्त्रीजननम्॥३१॥ पुरुषतराः ॥ ३२ ॥ शन्याराभ्यांपुरुषः ॥३३॥ शनिबुधाभ्यांस्त्रियः ॥ ३४ ॥ शनिचंद्राभ्यांकुजः ॥ ३५ ॥ शनिशुक्राभ्यांरूपवत्या ॥ ३६ ॥ शनिकेत्वोर्जारिणी ॥ ३७ ॥ तत्रबुधांशेबहिर्जारिणी ३८ ॥

चंद्रशुक्रौकामीप्रवीणतमश्च ॥ ३९ ॥ अंशभेदेन ॥ ४० ॥ बुधशुक्राभ्यांकामीविरागतः ॥ ४१ ॥ तत्रकेत्वंशे ॥ ४२ ॥ गोपमन्यतरः ॥४३॥ केत्वंशेबुधचन्द्रदृष्टेसर्ववर्णाश्रयेषुसंचरितः ॥४४॥ पापदृष्टेपुंश्चली ॥ ४५ ॥ सप्तमाष्टमयोः पापबल्येविधवा॥ ४६ ॥ तत्राष्टमेकुजेकेतुषु ॥४७॥ दृग्योगाभ्यांभर्तृहंत्री ॥ ४८ ॥ एकांशेन ॥ ४९ ॥ ओजयुग्ममार्गया ॥ ५० ॥ नीचेविपर्ययः ॥ ५१ ॥ षड्वर्गादौसान्निपातहनने ॥ ५२ ॥ मूर्तौरूपम् ॥५३॥ भाग्यांशगैश्चंद्रबाहुल्येबधशुक्राभ्यांसमतिः ॥५४॥ तत्रकेतुनाकेत्वंशेदुर्गंधी ॥५५॥ रविदृष्टेदंतवक्री ॥५६॥ कुजदृष्टेक्रोधकरी ॥ ५७ ॥ इतरग्रहदृग्योगः ॥५८॥ सौम्यश्च ॥५९॥ पापेपापबाहुल्या ॥६०॥ शुभेगुणवती ॥६१॥ मिश्रेसमाः ॥६२॥ एवमष्टमः सप्तमार्द्धहरितः ॥६३॥ त्रिकोणत्रिषडायेषु ॥६४॥ निचेविपर्ययः ॥६५॥ दिनभाग्ययोरानुकूल्ये ॥ ६६ ॥ शुभेतरमिश्रतरौच ॥ ६७ ॥ चक्षुर्वर्णभेदेननित्याश्च ॥ ६८ ॥ यत्ने अंशकतः ॥ ६९ ॥ राज्येनीचे ॥७०॥ धनेकामी ॥७१॥ धर्मेमोक्षी७२॥धनेपापी ॥७३॥तत्ररव्यंशेबालविधवा७४॥ रवित्रिकोणेषुच ॥ ७५ ॥ चंद्रेकामिनी ॥७६॥ चंद्रत्रिकोणेषुचकुजकुरूपिक्रोधी ॥७७॥ कुजत्रिकोणेषुच ॥ ७८ ॥ बुधेवंध्या॥ ७९ ॥ बुधेत्रिकोणेषुचागुरौपतिभक्तिपरायणी ॥ ८० ॥ गुरुत्रिकोणेषुच ॥ ८१ ॥ शुक्रेसर्वसौभाग्यकारिणी ॥ ८२ ॥ शुक्रत्रिकोणेषुच ॥ ८३ ॥ शनौकामिनीच

पुरुषः ॥८४॥ शनित्रिकोणेषुच ॥ ८५ ॥ राहुसर्वकर्मातम-
केषु—राहुत्रिकोणेषुच ॥ ८६ ॥ केतौचंडालितत्समानवर्ती
॥ ८७ ॥ तत्त्रिकोणेषुच ॥८८॥ एवंवर्णसंज्ञाःस्युः॥ ८९ ॥
चक्षुर्हीनम् ॥ ९० ॥ वर्णात्रिंशांशेआद्यापहारे ॥९१॥ पा-
पत्रिकोणेषुच ॥ ९२ ॥ यथास्वंनीचेषुच ॥ ९३ ॥ अंशग्र-
हबलानाम् ॥९४॥ रविशुक्राभ्यांप्रथमम् ॥ ९५ ॥ रविचं-
द्राभ्यांद्वितीयम् ॥९६॥ रविकुजाभ्यांतृतीयम् ॥९७॥ रवि-
बुधाभ्यांचतुर्थम् ॥ ९८ ॥ रविराहुभ्यांसप्तमम् ॥ ९९ ॥
रविकेतुभ्यामष्टमम् ॥ १०० ॥ एवंसर्वैरन्ध्रभाग्ययोर्वर्जयेत्
॥ १०१ ॥ लाभेचतत्रलाभयोः ॥ २ ॥ शुभेनदोषः ॥ ३ ॥
शुभपापयोर्नक्वचित् ॥ ४ ॥ रंध्रापवादेसौम्यत्रिकोणेमृग-
वर्गादि ॥५॥ स्वत्रिंशांशःस्वनीचभवने ॥ ६ ॥ यथामृग-
तौल्यादि ॥ ७॥ आद्यंशभेदेषु ॥ ८ ॥ राहुकेतुभ्यांप्रबंधः
॥ ९ ॥ वर्गोत्तमकाले ॥ १० ॥ प्राणीबलानि ॥ ११ ॥ नव-
त्रिषडाययोरंशः ॥१२॥ सप्ताष्टगुणचेष्टिताः ॥१३॥ गुभा-
गेनकर्तव्यम् ॥१४॥ लक्षलक्ष्यापवादयोः॥१५॥ क्रमात्क्रू-
रेशुभाभ्यांचव्युत्क्रमादुभयाययोः ॥१६॥ रंध्रसप्तमयोरेतत्
॥१७॥ बलसचरितेध्रुवाः ॥१८॥ एतद्योगविहीनस्तुनिश्चिं-
त्यःस्त्रीजातके ॥१९॥ इतिगुरुणाभ्यांवर्ण॥२०॥स्वपितृवर्ण-
श्च ॥ २१ ॥ इत्युपदेशसूत्रेचतुर्थाध्यायेतृतीयः पादः ॥३॥
गुणेषुगुणरमणी ॥१॥ केंद्रत्रिकोणेषुशुभवर्गेषु ॥ २ ॥ अ-
र्कारमंदफलयोः पुमांश्च ॥ ३ ॥ चंद्रबुधाभ्यांस्त्रीच ॥ ४ ॥
दृग्योगाभ्यामपि ॥ ५ ॥ यथानिर्हरणम् ॥६॥ रोगेपापैः

धवीपापदृग्योगान्निश्चयेन ॥ ७ ॥ उच्चेविलंबात् ॥ ८ ॥ नीचेक्षिप्रम् ॥९॥ मिश्रेमिश्रात्॥१०॥चंद्रकुजदृष्टौनिश्चयेन ॥ ११ ॥ आद्याआत्मजस्त्री ॥१२॥ कार्येपापेकोणेवा ॥१३॥ पापदृग्योगकालेवियोनिसंज्ञायांविधित्वादिति ॥१४॥ धात्वादिवर्णकाले ॥ १५ ॥ भावपरिवेधनेन ॥ १६ ॥ उच्चे स्वांशवर्गः ॥ १७ ॥ अर्धांशेपश्वादियोनिसंबंधः ॥ १८ ॥ मध्येमृगाः ॥ १९ ॥ अंत्येकीटकादयः ॥ २० ॥ एवमुभौ शुभलोके ॥२१ ॥ रविशुक्राभ्यांपापपूर्वम् ॥ २२ ॥ अन्यैरन्यथा ॥ २३ ॥ अत्रशुभः केतुः ॥ २४ ॥ पापदृग्योगान्न ॥२५॥ रविराहुशुक्राः ॥ २६ ॥ गुरुश्चैककालादृग्योगमिति ॥ २७ ॥ यथाचंद्रम् ॥ २८ ॥ तत्रगुरुवर्गेस्वास्यंशेच ॥२९॥ स्वेशभूमित्रनीचांशकश्च ॥ ३० ॥ पूर्णेंदुराह्वारांतरालाश्च ॥ ३१ ॥ शुभवर्गेशुभदृष्टियुतः ॥ ३२॥ अंशेमित्रभेदात् ॥३३॥ स्वानंदतुल्ये वा ॥३४॥ वर्गेनवांशश्च॥३५॥ तत्रज्ञानाज्ञानेषु ॥ ३६ ॥ पुत्रमाणिरमणी॥ ३७ ॥ बुधकेतुर्वा ॥३८॥ शुभचंद्राभ्याम्॥३९॥ स्वलग्ननाथाश्च ॥४०॥

इत्युपदेशसूत्रेवियोनिभेदोनामचतुर्थाध्यायस्यचतुर्थः पादः ॥ ४ ॥

इति चतुर्थाध्यायः ॥ ४ ॥

॥ इति जैमिनीयसूत्राणि समाप्तानि ॥

पुस्तक मिलनेका ठिकाना-
खेमराज श्रीकृष्णदास,
"श्रीवेंकटेश्वर" स्टीम् प्रेस-बम्बई.

"श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयकी परमोपयोगी स्वच्छ शुद्ध और सस्ती पुस्तकें।

यह विषय आज २५।३० वर्षसे अधिक हुआ भारतवर्षमें घर २ गाँव २ प्रसिद्ध है कि, इस यन्त्रालयकी छपी हुई पुस्तकें सर्वोत्तम और सुन्दर प्रतीत तथा प्रमाणित हुई हैं सो इस यन्त्रालयमें प्रत्येक विषयकी पुस्तकें जैसे-वैदिक. वेदान्त, पुराण, धर्मशास्त्र, न्याय, मीमांसा, छन्द, ज्योतिष, काव्य, अलंकार, चम्पू, नाटक, कोष, वैद्यक, साम्प्रदायिक तथा स्तोत्रादि संस्कृत और हिन्दी भाषाके अनेक अवसरपर बिक्रीके अर्थ तैयार रहतेहैं। शुद्धता स्वच्छता तथा कागज़की उत्तमता और जिल्दकी बँधाई देशभरमें विख्यात है। इतनी उत्तमता होनेपर भी दाम बहुतही सस्ते रक्खे गये हैं और कमीशनभी पृथक् काट दियाजाता है। ऐसी सरलता पाठकोंको मिलना असंभवहै संस्कृत तथा हिन्दीके रसिकोंको अवश्य अपनी २ आवश्यकतानुसार पुस्तकोंके मँगानेमें त्रुटि न करना चाहिये. ऐसा उत्तम, सस्ता और शुद्ध माल दूसरी जगह मिलना असम्भव है 'सूचीपत्र' मँगा देखो॥

KHEMRAJ SHRIKRISHNADAS,
Shri Venkateshwar Steam Press, BOMBAY.

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" छापाखाना-खेतवाडी-बंबई.